ये च અને જે और जो, आतुरा રોગીઓ रोगियो, केवलात् સંપૂર્ણ सपूर्ण, भेषजात् अपि ચિકિત્સા થવા છતાં પણ चिकित्सा करने पर भी, म्रियन्ते મરી જાય છે मरते हैं, ते च તે वे, सर्वे एव સર્વે सब, भेषजચિકિત્સા चिकित्साके, उपपन्ना મળવાથી मिलने पर भी, न समुत्तिष्ठेरन् સાજા થતા નથી स्वस्थ नहीं होते, हि કારણકે क्योकि, सर्वे સર્વે सब, व्याधय વ્યાધિઓ रोग, उपायसाध्याः ઉપાયસાધ્ય उपायसाध्य, न भवन्ति હોતા નથી नही होते, उपाय- વળી ઉપાયથી और उपायसे, साध्यानाम् સાધ્ય साध्य, व्याधीनाम् વ્યાધિઓની रोगोकी, अनुपायेन ઉપાય વિના बिना उपायके, सिद्धि સિદ્ધિ सिद्धि, न अस्ति થતી નથી नही होती, असाध्यानाम् च અને અસાધ્ય और असाध्य, व्याधीनाम् च વ્યાધિઓ માટે व्याधियोंके लिए, अयम् આ यह, भेषजसमुदाय. ભેષજસમૂહ औषधसमुदाय, न अस्ति નથી नही है, हि કારણકે क्योकि, ज्ञानवान् પૂર્ણ જ્ઞાનવાળો ज्ञानी, भिषक् વૈદ્ય પણ वैद्य भी, मुमूर्षुम् મરણોન્મુખ मरनेवाले, आतुरम् રોગીને रोगीको, उत्थापयितुम् સ્વસ્થ કરવા स्वस्थ करनेमें, न अलम् સમર્થ નથી समर्थ नही होता,

5-(4) As regards those patients who die inspite of full treatment, not all of them could be expected to recover by the blessing of treatment. For, not all diseases are amenable to treatment and yet of those diseases as are amenable to treatment, cure cannot be accomplished except by treatment. However, the whole pharmacopoeia will fail in curing irremediable diseases; and no physician, however clever, is able to save a dying patient.

परीक्ष्यकारिणो हि कुशला भवन्ति, यथा हि योगज्ञोऽभ्यासनित्य इष्वासो धनुरादायेषुमस्यन्नातिविप्रकृष्टे महति काये नापराधवान् भवति,

५ ते भेषजोपपन्ना—सम्पूर्णा भेषजोपपन्ना (ग)
,, भेषजसमुदायोऽयमस्ति-भेषजसमुदायोऽस्ति (घ)
,, अयमस्ति—अलमास्ते (त)

५ नातिविप्रकृष्टे महति काये—नातिविप्रकृष्टे नातिमहतिकाये (ठ.)
,, नापराधवान्—नापवाध (ढ.)
,, ,, —नापराधः; नापराद्ध (प)

संपादयति चेष्टकार्य, तथा भिषक् स्वगुणसंपन्न उपकरणवान् वीक्ष्य कर्मारभमाण. साध्यरोगमनपराधः संपादयत्येवातुरमारोग्येण, तस्मान्न भेषजमभेषजेनाविशिष्टं भवति ॥ ५॥

परीक्ष्य- વિચાર કરીને देख भाल कर, कारिण हि કામ કરવાવાળા મનુષ્યો कार्य करनेवाले मनुष्य, कुशला કુશળ कुशल, भवन्ति હોય છે होते हैं, यथा हि જેમ जैसे, योगज्ञ ધનુર્વિદ્યા જાણનારો धनुर्विद्याको जाननेवाला, अभ्यासनित्य तथा નિત્ય અભ્યાસવાળો अभ्यासशील, इष्वास ધનુર્ધારી धनुर्धारी, धनु ધનુષ્ય धनुष्यको, आदाय લઈને लेकर, नातिविप्रकृष्टे બહુ નજીકના वहुत दूर न हो ऐसे, महति અને મોટા વડે, काये આકારવાળા લક્ષ્યમા आकृतिवाले लक्ष्यपर, इषुम् બાણ वाण, अस्यन् ફેંકતો छोडता हुआ, अपराधवान् નિષ્ફળ अमफल, न નથી नहीं, भवति થતો होता, इष्टकार्यम् च અને ઇષ્ટકાર્યને और अपने इष्ट कार्यको. सपादयति સંપાદન કરી લે છે सपादित करता है, तथा તેમ वैसे ही, स्वगुणसपन्न સ્વગુણયુક્ત अपने गुणोंसे सम्पन्न, उपकरणवान् અને ઉપકરણવાન સાધનયુક્ત, वीक्ष्य અને વિચારીને साध्यासाध्यकी परीक्षा करके, कर्म ચિકિત્સા चिकित्सा, आरभमाण કરતો करता हुआ, भिषक् વૈદ્ય वैद्य, अनपराध. કાંઈ પણ ચૂક કર્યા વગર किसी भी प्रमादके विना, साध्यरोगम् સાધ્યરોગવાળા साध्यरोगवाले, आतुरम् રોગીને रोगीको, आरोग्येण આરોગ્યથી स्वास्थ्यसे, संपादयति एव યુક્ત કરે જ છે युक्त करता ही है, तस्मात् તેથી इसलिए, भेपजम् ચિકિત્સા चिकित्सा, अभेषजेन અચિકિત્સાના अचिकित्साके, अविशिष्टम् સમાન समान, न भवति નથી नहीं होती ॥ ५ ॥

5. Hence those alone that act after investigation are considered wise. As a bowman who is a good marksman and given to constant practice, taking up a bow and releasing an arrow does not fail in hitting a big target that is not too far off, and achieves his purpose, so does a physician of accomplishment and means who starts treating a curable disease after full investigation, without fail bestow health on the patient. Hence it cannot be said that treatment is no better than no treatment.

५. वीक्ष्य–परीक्ष्य (ग. घ.)

चिकित्सासूत्रम्—

इदं च न. प्रत्यक्षं–यदनातुरेण भेपजेनातुरं चिकित्सामः, क्षाममक्षामेण, कृशं च दुर्बलमाप्याययामः, स्थूलं मेदस्विनमपतर्पयामः, शीतेनोष्णाभिभूतमुपचरामः, शीताभिभूतमुष्णेन, न्यूनान् धातून् पूरयाम., व्यतिरिक्तान् ह्रासयामः, व्याधीन् मूलविपर्ययेणोपचरन्तः सम्यक् प्रकृतौ स्थापयामः.तेषां नस्तथा कुर्वतामयं भेषजसमुदायः कान्ततमो भवति ॥ ६॥

इदम् च અને આ यह, न અમને हमे, प्रत्यक्षम् પ્રત્યક્ષ છે प्रत्यक्ष है, यत् કે कि, आतुरम् રોગીની रोगीकी, अनातुरेण રોગીના ગુણથી વિપરીત रोगीके गुणसे विपरीत, भेषजेन ઔષધથી औषधसे, चिकित्साम ચિકિત્સા કરીએ છીએ चिकित्सा करते है, क्षामम् ક્ષીણની क्षीणकी, अक्षामेण બૃંહણ ઔષધથી ચિકિત્સા કરીએ છીએ वृहण औषधसे चिकित्सा करते है, कृशम् કૃશ कृश, दुर्बलम् च અને દુર્બલનુ और दुर्वलका, आप्याययाम. સંતર્પણ કરીએ છીએ तर्पण करते हैं, स्थूलम् સ્થૂલ स्थूल, मेदस्विनम् અને મેદસ્વીનુ और मेदस्वीका, अपतर्पयाम અપતર્પણ કરીએ છીએ अपतर्पण करते हैं, उष्ण अभिभूतम् ગરમીથી પીડાતા રોગીની गरमीसे पीडित रोगीकी, शीतेन શીત ક્રિયાવડે शीतल क्रियासे, शीत–अभिभूतम् અને ટાઢથી પીડાતા રોગીની और शीतसे पीडित रोगीकी, उष्णेन ઉષ્ણ ક્રિયાથી उष्णक्रियासे, उपचराम. ચિકિત્સા કરીએ છીએ चिकित्सा करते हैं, न्यूनान् ન્યૂન कम हुई, धातून् ધાતુઓનુ धातुओको, पूरयामः પૂરણ કરીએ છીએ पूर्ण करते हैं,

६ इद च न –इद चेद च न (क छ ज झ ध)
,, च न–पुन (ग)
,, चिकित्साम -उपचराम (ध)
,, व्यतिरिक्तान्–अतिरिक्तान् (ग)
,, सम्यक्–स्वस्थ (ठ.)

व्यतिरिक्तान् વધેલા ધાતુઓના बढी हुई धातुओंको, ह्रासयाम. હ્રાસ કરીએ છીએ घटाते हैं, व्याधीन् રોગોને रोगोंको, सम्यक् સારી રીતે अच्छी तरह, मूल- હેતુથી हेतुसे, विपर्ययेण વિપરીત विपरीत, उपचरन्त. ચિકિત્સાથી નષ્ટ કરતા चिकित्सा द्वारा नष्ट करते हुए, प्रकृतौ સમતામાં समतामें, स्थापयाम મૂકીએ છીએ स्थापित करते है, तेषाम् તેઓની रोगियोंकी, तथा कुर्वताम् આવી રીતે ચિકિત્સા કરતાં इस प्रकार चिकित्सा करते हुए, नः આપણને हमारेको, अयम् આ यह, भेषज- समुदाय ભેષજ સંગ્રહ भेषजसमुदाय, कान्ततम. અત્યંત અભીષ્ટ अति इष्ट, भवति થાય છે होता है ॥ ६ ॥

6. This much is evident to us all, viz., we treat a disease-ridden man with disease-removing measures and the depleted man with impletion We nourish the emaciated and the feeble; starve the corpulent and the fatty, treat the man afflicted by heat with cooling measures and with hot things him who is afflicted with cold. We replenish body-elements that have suffered decrease, and deplenish those that have undergone increase. By treating disorders properly with what are antagonistic to their origin, we restore the patient to the normal condition. In our hands, administering in this manner, the pharmacopoeia shows itself to the best of its glory.

चिकित्साया यशोलाभे कारणम्—

भवन्ति चात्र—

साध्यासाध्यविभागज्ञो ज्ञानपूर्वं चिकित्सकः ।
काले चारभते कर्म यत्तत् साधयति ध्रुवम् ॥७॥

अत्र च આ વિષયમાં इस विषयमें, भवन्ति શ્લોકો છે કે श्लोक हैं कि, साध्य- સાધ્ય साध्य, असाध्य- તથા અસાધ્યના और असाध्यको, विभागज्ञ વિભાગને જાણનાર पृथक् रूपसे जाननेवाला, चिकित्सक વૈદ્ય वैद्य, यत् कर्म જે કર્મનો जिस कर्मका, काले च યોગ્ય કાળે યથા સમય, ज्ञानपूर्वम् જ્ઞાનપૂર્વક ज्ञानपूर्वक, आरभते આરંભ કરે છે आरंभ करता है, तत् તેને उसको, ध्रुवम અવશ્ય अवश्य, साधयति સિદ્ધ કરે છે सफल करता है ॥ ७ ॥

Here are verses again—

7 The physician who knows the differential diagnosis between the curable and the incurable diseases and begins treatment with full knowledge of the case and in time, obtains success for his effort without fail.

असाध्यरोगचिकित्साया हानिः—

अर्थविद्यायशोहानिमुपक्रोशमसंग्रहम् ।
प्राप्नुयान्नियतं वैद्यो योऽसाध्यं समुपाचरेत् ॥८॥

यः वैद्यः જે વૈદ્ય जो वैद्य, असाध्यम् અસાધ્ય વ્યાધિનો असाध्य रोगकी, समुपाचरेत् ઉપચાર કરે છે चिकित्सा करता है, स તે वह, अर्थ- પૈસો द्रव्य, विद्या- વિદ્યા विद्या, यश - તથા યશની व यशकी, हानिम् હાનિ हानि, उपक्रोशम् નિન્દા निन्दा, असंग्रहम् અને લોકો તરફથી પરિત્યાગને और जनतासे परित्यागको, नियतम् અવશ્ય अवश्य, प्राप्नुयात् પ્રાપ્ત કરે છે प्राप्त करता है ॥ ८ ॥

8 But the physician who undertakes to treat incurable diseases will invariably suffer loss of income, tarnish his learning and fame, and earn for himself disrepute and unpopularity to boot.

रोगाणा साध्यासाध्यत्वेऽपि पुनर्विभागः—

सुखसाध्यं मतं साध्यं कृच्छ्रसाध्यमथापि च ।
द्विविधं चाप्यसाध्यं स्याद्याप्यं यच्चानुपक्रमम् ॥९॥

सुखसाध्यम् સુખસાધ્ય सुखसाध्य, अथ अपि च અને और, कृच्छ्रसाध्यम् કષ્ટસાધ્ય એમ कष्टसाध्य इस तरह, साध्यम् સાધ્યરોગ साध्यरोग, मतम् બે પ્રકારનો માન્યો છે दो प्रकारका माना है, याप्यम् યાપ્ય

८ अर्थ—स्वार्थ (च ङ ध)
,, असंग्रहम्—असद्ग्रहम् (ध.)
९. यच्चानुपक्रमम्—यदनुपक्रमम् (ध.)

याप्य, यत् च અને જે और जो, अनुपक्रमम् અનુપક્રમ प्रत्याख्येय, (तत् તે वह), असाध्यम् च अपि અસાધ્ય રોગ પણ असाध्य रोग भी, द्विविधम् એ પ્રમાણે એ પ્રકારનો इसी तरह दो प्रकारका, स्यात् છે है ॥ ९ ॥

9 The curable diseases are of two kinds those that are easily cured and those that are cured with difficulty. The incurable diseases also fall into two categories those that are palliable and those that are absolutely irremediable

साध्यानां त्रिविधश्चाल्पमध्यमोत्कृष्टतां प्रति ।
विकल्पो, न त्वसाध्यानां नियतानां विकल्पना ॥१०॥

अल्प-मध्यम-उत्कृष्टताम् અલ્પ ઉપાયથી સાધ્યપણું –મધ્યમ ઉપાયથી સાધ્યપણું તથા ઉત્કૃષ્ટ ઉપાયથી સાધ્યપણું अल्प उपायसे साध्यता–मध्यम उपायसे साध्यता तथा उत्कृष्ट उपायसे साध्यता, प्रति એઓને ઉદ્દેશી इनका उद्देश रखकर, साध्यानाम् સાધ્યરોગોનો साध्यरोगोंका, विकल्प ભેદ भेद, त्रिविध. ત્રણ પ્રકારનો થાય છે तीन प्रकारका होता है, नियतानाम् असाध्यानाम् तु પરંતુ નિશ્ચિત રૂપવાળા યાપ્યથી ભિન્ન અસાધ્યરોગોનો परन्तु निश्चित रूपवाले याप्यसे भिन्न असाध्य रोगोंका, विकल्पना ભેદ भेद, न થતો નથી नहीं होता ॥१०॥

10 The curables are, again, classed in three fresh categories by reason of their requiring mild, moderate or strong treatment. The incurable ones, being inexorable, admit of no such classification

सुखसाध्यस्य लक्षणम्—

हेतवः पूर्वरूपाणि रूपाण्यल्पानि यस्य च ।
न च तुल्यगुणो दूष्यो न दोषः प्रकृतिर्भवेत् ॥११॥
न च कालगुणस्तुल्यो न देशो दुरुपक्रमः ।
गतिरेका नवत्वं च रोगस्योपद्रवो न च ॥१२॥
दोषश्चैकः समुत्पत्तौ देहः सर्वौषधक्षमः ।
चतुष्पादोपपत्तिश्च सुखसाध्यस्य लक्षणम् ॥१३॥

१२ देशो–दोषो (ग.)

यस्य च જે રોગનાં जिस रोगके, हेतव કારણ कारण, पूर्वरूपाणि પૂર્વરૂપ पूर्वरूप, रूपाणि च અને રૂપ और रूप, अल्पानि થોડાં હોય अल्प हों, दूष्यः च દૂષ્ય दूष्य, तुल्यगुण સમાન ગુણવાળું समान गुणवाला, न ન હોય न हो, दोष દોષ दोष, प्रकृति ઉત્કટ રૂપવાળો उत्कट रूपवाला, न ન न, भवेत् હોય हो, कालगुण च જેમાં ઋતુના ગુણ ऋतुके गुण, तुल्य. न સમાન ન હોય समान न हों, देश. દેશ પણ देश भी, दुरुपक्रमः न ચિકિત્સા માટે અયોગ્ય ન હોય चिकित्साके लिए अयोग्य न हो, गतिः ગતિ गति, एका એક હોય एक हो, रोगस्य च વળી રોગનું रोगका, नवत्वम् નવીનપણું હોય नयापन हो, उपद्रव તેનો ઉપદ્રવ उसका उपद्रव, न ન હોય न हो, समुत्पत्तौ च તેની ઉત્પત્તિમાં उसकी उत्पत्तिमें, एक એક જ एक ही, दोष. દોષ કારણ હોય दोष कारण हो, देह રોગીનું શરીર रोगीका शरीर, सर्व-औषध- સર્વ પ્રકારની ઓષધિઓ सब प्रकारकी औषधको, क्षम સહેવામાં સમર્થ હોય सहन कर सके ऐसा हो, चतुष्पाद-उपपत्ति च અને વૈદ્ય વગેરે ચાર પાદોની સપ્રાપ્તિ હોય और वैद्य आदि चार पादोंकी सम्प्राप्ति हो, सुखसाध्यस्य આ સુખસાધ્ય રોગનું यह सुखसाध्य रोगका, लक्षणम् લક્ષણ છે लक्षण है ॥११-१३॥

11-13. The characteristics of an easily curable disease are the causes, premonitory symptoms and symptoms are mild, the morbific factor is homologous neither to the affected body-element nor to the habitus of the patient, nor to the traits of the prevailing season, the place of disease is not inaccessible to treatment; the course of disease is localised in one system, is recent, has no complication and is born of the predominant morbidity of only a single humor; the body is in a condition to withstand all treatment and the fourfold requisites of treatment are at hand. These are the circumstances in which a disease is easily curable.

कृच्छ्रसाध्यस्य लक्षणम्—

निमित्तपूर्वरूपाणां रूपाणां मध्यमे बले ।
कालप्रकृतिदूष्याणां सामान्येऽन्यतमस्य च ॥ १४॥
गर्भिणीवृद्धबालानां नात्युपद्रवपीडितम् ।
शस्त्रक्षाराग्निकृत्यानामनवं कृच्छ्रदेशजम् ॥ १५॥
विद्यादेकपथं रोगं नातिपूर्णचतुष्पदम् ।
द्विपथं नातिकालं वा कृच्छ्रसाध्यं द्विदोषजम् ॥१६॥

निमित्त- કારણ कारण, पूर्वरूपाणाम् પૂર્વરૂપ पूर्वरूप, रूपाणाम् અને રૂપનુ और रूपका, बले બળ बल, मध्यमे મધ્યમ હોતાં मध्यम होनेपर, काल- તેમજ કાલ एव काल, प्रकृति- પ્રકૃતિ प्रकृति, दूष्याणाम् અને દૂષ્ય એઓમાંથી और दूष्य इनमेंसे, अन्यतमस्य च કોઈ એકની कोई एककी, सामान्ये દોષની સાથે સમાનતા હોતાં ઉત્પન્ન થયેલા રોગને दोषके साथ समानता होने पर उत्पन्न हुए रोगको, गर्भिणी- ગર્ભિણી गर्भिणी, वृद्ध- વૃદ્ધ वृद्ध, बालानाम् અને બાળકોને થયેલા રોગને और बालकोंके रोगको, न-अति-उपद्रव-पीडितम् ઉપદ્રવોથી અત્યંત નહિ પીડાયેલા રોગને उपद्रवोंसे अत्यंत पीडित नही हुए रोगको, शस्त्र- શસ્ત્ર शस्त्र, क्षार- ક્ષાર क्षार, अग्नि- તથા અગ્નિથી और अग्निसे, कृत्यानाम् સાધ્યરોગોમાંના साध्यरोगोंमेंसे, अनवम् કોઈપણ જીર્ણ રોગને कोई भी पुराने रोगको, कृच्छ्रदेशजम् મર્માદિ પ્રદેશમાં ઉત્પન્ન થયેલા રોગને मर्मादि स्थानोंमें उत्पन्न हुए रोगको, न अतिपूर्ण- અપૂર્ણ अपूर्ण, चतुष्पदम् ચાર પાદવાળો चार पादोंसे युक्त, एकपथम् એક માર્ગગત રોગને एक मार्गगामी रोगको, न-अतिकालम् અથવા બહુ જીર્ણ નહિ એવા बहुत पुराना न हो ऐसे, द्विपथम् रोगम् वा દ્વિમાર્ગી રોગને द्विमार्गगामी रोगको, द्विदोषजम् તથા બે દોષથી ઉત્પન્ન થયેલા રોગને तथा दो दोषोंसे उत्पन्न हुए रोगको, कृच्छ्रसाध्यम् કૃચ્છ્રસાધ્ય कष्टसाध्य, विद्यात् જાણવો जानना चाहिए ॥ १४-१६ ॥

14-16. The formidable diseases are—those wherein the causes, the premonitory symptoms and symptoms are of moderate strength when any one of the three—the season, the habitus and the susceptibility of body elements—is homologous with the morbific factor; the ailments of a gravida, the aged and children; those that are not much aggravated by complication, those requiring operative, casutic and cauterizing procedures, those that have gone beyond the incipient stage, those that are located in a place difficult of access; those whose course is localized in one system; if the full complement of the fourfold medical equipment is not available, diseases which have spread through two systems but have not become very chronic, and those due to the predominant morbidity of two humours.

याप्यस्य लक्षणम्, प्रत्याख्येयस्य लक्षणम्—

शेषत्वादायुषो याप्यमसाध्यं पथ्यसेवया ।
लब्धाल्पसुखमल्पेन हेतुनाऽऽशुप्रवर्तकम् ॥ १७॥
गम्भीरं बहुधातुस्थं मर्मसन्धिसमाश्रितम् ।
नित्यानुशायिनं रोगं दीर्घकालमवस्थितम् ॥ १८॥
विद्याद्द्विदोषजं, तद्वत् प्रत्याख्येयं त्रिदोषजम् ।
क्रियापथमतिक्रान्तं सर्वमार्गानुसारिणम् ॥ १९॥
औत्सुक्यारतिसंमोहकरमिन्द्रियनाशनम् ।
दुर्बलस्य सुसंवृद्धं व्याधिं सारिष्टमेव च ॥ २०॥

पथ्य- सेवया પથ્યના સેવનથી पथ्यके सेवनसे, लब्ध-अल्प-सुखम् જેમાં થોડુ સુખ મળતુ હોય એવા जिसमें थोडा सुख मिलता हो ऐसे, अल्पेन અલ્પ थोडेसे, हेतुना કારણથી कारणसे, आशु-प्रवर्तकम् જલદી પ્રવર્તનાર जल्दी बढ जानेवाले, गम्भीरम् ગંભીર गम्भीर, बहुधातु-स्थम् બહુ ધાતુમાં રહેલો बहुतसी धातुओंमें स्थित, मर्म-संधि- મર્મ અને સંધિઓમાં मर्म और सन्धियोंमें,

---

१५. गर्भिणी—गुर्विणी (ख ज ठ ध प)
,, वृद्धबाला—बालवृद्धा (ग)
,, कृच्छ्रदेशजम्—कृच्छ्रदोषजम् (ड)
१६. द्विपथ—द्विपद (प)

१७ हेतुनाऽऽशुप्रवर्तकम्—हेतुना सुप्रवर्तकम् (प)
२०. दुर्बलस्य सुसवृद्ध—दुर्बलस्यातिमवृद्धम् (ग)

समाश्रितम् રહેલ आश्रित, **नित्यानुशायिनम्** સદા રહેનારા सदा रहनेवाला, **दीर्घकालम्** લાંબા સમયથી दीर्घकालसे, **अवस्थितम्** સ્થિતિવાળા चला आता हुआ, **द्विदोषजम्** અને બે દોષોથી ઉત્પન્ન થયેલા और दो दोषोंसे उत्पन्न हुए, **असाध्यम्** અસાધ્ય असाध्य, **रोगम्** રોગને रोगको, **आयुषः** આયુષ્ય आयुके, **शेषत्वात्** શેષ હોવાથી अवशिष्ट होनेसे, **याप्यम्** યાપ્ય याप्य, **विद्यात्** જાણવો जानना चाहिए, **तद्वत्** ગંભીરપણું વગેરે યાપ્યનાં લક્ષણોવાળા गंभीरता आदि याप्यके लक्षणोंवाले, **त्रिदोषजम्** ત્રિદોષથી ઉત્પન્ન થયેલા त्रिदोषजन्य, **क्रियापथम्** ચિકિત્સાક્રમને चिकित्साक्रमको, **अतिक्रान्तम्** ઓળંગી ગયેલ उल्लंघन कर गया हो ऐसे, **सर्व-** બધા सब, **मार्ग-** માર્ગોમાં मार्गोंमें, **अनुसारिणम्** ફેલાયેલા फैले हुए, **औत्सुक्य-** ઉત્સુકતા उत्सुकता, **अरति-** અરતિ अरति, **संमोह-** તથા સંમોહ और समोहको, **करम्** કરનારા करनेवाले, **इन्द्रिय-** ઇન્દ્રિયોની इन्द्रियोंकी, **नाशनम्** શક્તિને નષ્ટ કરનારા शक्तिका नाश करनेवाले, **दुर्बलस्य** દુર્બલ પુરુષમાં दुर्बल पुरुषमें, **सुसंवृद्धम्** ઘણા ઉપદ્રવોવાળા बहुत उपद्रवोंसे युक्त, **सारिष्टम् एव च** અને મૃત્યુસૂચક લક્ષણોવાળા और अरिष्टके लक्षणोंसे युक्त, **व्याधिम्** અસાધ્ય રોગને असाध्य रोगको, **प्रत्याख्येयम्** પ્રત્યાખ્યેય प्रत्याख्येय, **विद्यात्** જાણવો जानना चाहिए ॥ १७–२० ॥

17-20. The diseases of the following description are to be regarded as incurable but palliable; viz. those in which the patient, being still spared with some life-span, needs to be kept going by means of strict regimen, those which admit of slight relief, but which also get readily aggravated from slight causes, those which are deep-seated, those which affect many body-elements; those which have lodged themselves in vital parts and joints; those which are constantly relapsing; those which are of long standing and those which are born of the discordance of two humors.

The following diseases are both incurable and immitigable, those which are similar to the above (with the exception of the expectation of life still left and the possibility of some relief), which are born of the complete discordance of all the three humors, which have gone beyond the stage of treatment, which have spread to all the systems of the body, which give rise to (sudden and extreme) excitement, restlessness and stupefaction, which destroy the sense-faculties, which afflicting weakened constitutions get greatly aggravated, and which are accompanied with the fatal prognostic signs

रोगस्य साध्यासाध्यज्ञानप्रयोजनम्—

भिषजा प्राक् परीक्ष्यैवं विकाराणां स्वलक्षणम् ।
पश्चात्कर्मसमारम्भः कार्यः साध्येषु धीमता ॥२१॥

धीमता બુદ્ધિમાન बुद्धिमान, **भिषजा** વૈદ્યે वैद्य, **एवम्** આ પ્રમાણે इस प्रकार, **प्राक्** સૌથી પહેલાં सबसे प्रथम, **विकाराणाम्** વ્યાધિઓનાં व्याधिओंके, **स्वलक्षणम्** પોતાનાં લક્ષણોની अपने लक्षणोंकी, **परीक्ष्य** પરીક્ષા કરીને परीक्षा करके, **पश्चात्** પછી पीछे, **साध्येषु** સાધ્ય રોગોમાં साध्य रोगोंमें, **कर्म-** ચિકિત્સાનો चिकित्साका, **समारम्भ** પ્રારંભ प्रारम्भ, **कार्य-** કરવો करे ॥२१॥

21. A wise physician should first examine the signs and symptoms of the disease and only then commence treatment of curable diseases.

साध्यासाध्यविभागज्ञो यः सम्यक्प्रतिपत्तिमान् ।
न स मैत्रेयतुल्यानां मिथ्याबुद्धिं प्रकल्पयेत् ॥२२॥

२१. पश्चात्कर्मसमारम्भ –पश्चात्कार्यसमारम्भ (च. त. द)
२२. प्रकल्पयेत्–विवर्द्धयेत् (ध.)

य जे जो, साध्य-असाध्य- साध्य अने असाध्यना साध्य व असाध्यके, विभागज्ञ· भेदने जाणनार भेदको जाननेवाला, सम्यक् तथा सारी रीतना श्रेष्ठ प्रकारके प्रतिपत्तिमान् ज्ञानथी युक्त होय ज्ञानसे युक्त हो, स ते वह, मैत्रेय- मैत्रेय मैत्रेयके, तुल्यानाम् जेवा मनुष्यो समान मनुष्योंकी, मिथ्या- मिथ्या मिथ्या, बुद्धिम् बुद्धि बुद्धिको, न प्रतिकल्पयेत् करतो नथी नहीं करता ॥ २२ ॥

22 One who knows the differential diagnosis between curable and incurable diseases, as also the right application, will not fall into such erroneous mode of thinking as Maitreya and others did (in this discourse)

अध्यायार्थसंग्रहः —

तत्र श्लोकौ—

इहौषधं पादगुणाः प्रभावो भेषजाश्रयः ।
आत्रेयमैत्रेयमती मतिद्वैविध्यनिश्चयः ॥ २३ ॥
चतुर्विधविकल्पाश्च व्याधयः स्वस्वलक्षणाः ।
उक्ता महाचतुष्पादे येष्वायत्तं भिषग्जितम् ॥ २४ ॥

तत्र ते विषयमां उस विषयमें, श्लोकौ उपसंहारना बे श्लोको छे के उपसहारके दो श्लोको हैं कि, इह महाचतुष्पादे आ 'महाचतुष्पाद' नामना अध्यायमां इस 'महाचतुष्पाद' नामके अध्यायमे, औषधम् औषध औषध, पादगुणा चार पादोना गुण चतुष्पादके गुण, भेषजाश्रय औषधमां रहेलो औषधसम्बन्धी, प्रभावः प्रभाव प्रभाव, आत्रेय- आत्रेय आत्रेय, मैत्रेय- अने मैत्रेयना और मैत्रेयके, मती मत मत, मति- तथा मतना तथा मतके, द्वैविध्य- बन्ने प्रकारोना दोनो प्रकारोंका, निश्चय निश्चय निश्चय, चतुर्विध–विकल्पा चार प्रकारना विकल्प चार प्रकारके विकल्प, येषु अने जेओ जिन पर, भिषग्जितम् चिकित्सा चिकित्सा, आयत्तम् आश्रित छे आश्रित है, स्व स्व-लक्षणा ते पोतपोतानां लक्षणोवाळा वे अपने अपने लक्षणोंवाले, व्याधय रोगो रोगो, उक्ता कह्या छे कहे हैं ॥ २४ ॥

Here is a couple of recapitulatory verses—

23-24. Here in this major chapter on the "Fourfold Basic Factors of Therapeutics", have been laid down treatment, its composition and character, the result proceeding from treatment, the difference of opinion between Atreya and Maitreya, the decision concerning this doctrinal difference, and the fourfold classification of curability and incurability of diseases, together with the characteristics of each class

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते श्लोकस्थाने महाचतुष्पादो नाम दशमोऽध्यायः ॥ १० ॥

इति आ प्रमाणे इस प्रकार, अग्निवेशकृते अग्निवेशे रचेला अग्निवेशसे बनाये, चरकप्रतिसंस्कृते तन्त्रे अने चरकथी प्रतिसंस्कार पामेला आ शास्त्रमां और चरकके द्वारा संस्कृत इस शास्त्रके, श्लोकस्थाने सूत्रस्थान विषे सूत्रस्थानमे, महाचतुष्पाद 'महाचतुष्पाद' 'महाचतुष्पाद', नाम नामनो नामका, दशम दशमो दसवॉ, अध्याय अध्याय अध्याय, समाप्त संपूर्ण थयो समाप्त हुआ ॥ १० ॥

10 Thus in the section on General Principles of the treatise compiled by Agnivesa and revised by Caraka, the tenth major chapter entitled "The Fourfold Basic Factors in Therapeutics", is completed

एकादशोऽध्यायः।

અગિયારમો અધ્યાય ग्यारहवाँ अध्याय

Chapter XI

तिस्रैषणीयाध्यायोपक्रमः—

अथातस्तिस्रैषणीयमध्यायं व्याख्यास्यामः ॥ १ ॥

इति ह स्माह भगवानात्रेयः ॥ २ ॥

अथ अत હવે અહીંથી अब आगे, तिस्रैषणीयम् 'તિસ્રૈષણીય' નામના 'तिस्रैषणीय' नामके, 'अध्यायम् અધ્યાયનું अध्यायका, व्याख्यास्याम વ્યાખ્યાન કરશું व्याख्यान करेंगे ॥ १ ॥

भगवान् ભગવાન भगवान्, आत्रेय. આત્રેયે आत्रेयने, इति ह આ વિષયમાં નીચે પ્રમાણે જ इस विषयमें निम्न प्रकारसे ही, आह स्म કહેલું છે कहा है ॥२॥

1 We shall now expound the chapter entitled "The three pursuits of men".

2 Thus declared the worshipful Atreya.

तिस्र एषणा.—

इह खलु पुरुषेणानुपहतसत्त्वबुद्धिपौरुषपराक्रमेण हितमिह चामुष्मिंश्च लोके समनुपश्यता तिस्र एषणाः पर्येष्टव्या भवन्ति–प्राणैषणा, धनैषणा, परलोकैषणेति ॥ ३ ॥

इह खलु આ સંસારમાં यहां, इह આ લોક इहलोक, अमुष्मिन् च लोके અને પરલોકમાં एवं परलोकमें, हितम् હિતને हित, समनुपश्यता ઇચ્છતા चाहनेवाले, अनुपहत-सत्त्व-बुद्धि-पौरुष-पराक्रमेण મન-બુદ્ધિ-શારીરિક બળ અને શૌર્યથી સંપન્ન मन-बुद्धि-पौरुष और शौर्यसे संपन्न, पुरुषेण પુરુષે पुरुषको, तिस्र ત્રણ तीन, एषणा એષણાઓ एषणायें, पर्येष्टव्या भवन्ति કરવી જોઈએ करनी चाहिए, तत् यथा જેમકે जैसेकि, प्राणैषणा પ્રાણૈષણા प्राणैषणा, धनैषणा ધનૈષણા धनैषणा, परलोकैषणा इति અને પરલોકૈષણા और परलोकैषणा ॥३॥

3. Three indeed are the pursuits that should be followed by every man who is possessed of unimpaired intelligence, understanding, energy and enterprise and who wishes to secure his good both in this world and hereafter They are the pursuit of life, the pursuit of wealth, and the pursuit of the other world

प्रथमा प्राणैषणा—

आसां तु खल्वेषणानां प्राणैषणां तावत् पूर्वतरमापद्येत। कस्मात्? प्राणपरित्यागे हि सर्वत्यागः।

आसाम् આ इन, एषणानाम् એષણાઓમાં एषणाओंमें, तु खलु પણ તો, प्राणैषणाम् तावत् પ્રાણૈષણા ખરેખર प्राणैषणाको ही, पूर्वतरम् સૌથી પ્રથમ पहिले, आपद्येत કરવી જોઈએ करनी चाहिए, कस्मात् શા માટે किस लिए, प्राण परित्यागे हि પ્રાણનો ત્યાગ થતાંજ प्राणोंके छोडनेपर अवश्य ही, सर्वत्याग સર્વનો ત્યાગ થાય છે सबको छोडना पडता है,

4-(1). From among these pursuits, the pursuit of life is to be given priority. Why? Because the giving up of life means the giving up of everything

तस्यानुपालनं—स्वस्थस्य स्वस्थवृत्तानुवृत्तिः, आतुरस्य विकारप्रशमनेऽप्रमादः, तदुभयमेतदुक्तं वक्ष्यते च;

स्वस्थस्य સ્વસ્થનું स्वस्थका, स्वस्थवृत्तानुवृत्ति સ્વસ્થવૃત્તિનું અનુવર્તન स्वस्थवृत्तका पालन, आतुरस्य અને રોગીની और रोगीका, विकार- प्रशमने વ્યાધિપ્રશમનમાં विकारशमनमें, अप्रमाद સાવધાનતા એ प्रमाद न करना यह, तस्य તે પ્રાણનું उस प्राणका, अनुपालनम् રક્ષણ છે रक्षण है, तत्-एतत् તે આ ये, उभयम् બન્ને दोनों, उक्तम् કહ્યાં છે पहले कह दिये गये हैं, वक्ष्यते च અને હવે પછી કહેવામાં આવશે और आगे भी कहे जायेंगे,

4-(2) The preservation of life is done (in two ways), by the healthy

---

४. प्राणैषणा तावत्–प्राणैषणाम् (ध)

„ स्वस्थानुवृत्तिः–स्वस्थवृत्ति (ख)

observing the rules of health, and by the ailing being diligent in the alleviation of abnormal symptoms These two aspects have been touched upon and will be dealt with hereafter

तद्यथोक्तमनुवर्तमानः प्राणानुपालनाद्दीर्घमायुरवाप्नोतीति प्रथमैषणा व्याख्याता भवति ॥४॥

तत् ते उसका, यथोक्तम् શાસ્ત્રમાં કહેલા નિયમને विधिपूर्वक, अनुवर्तमान. અનુસરનાર મનુષ્ય पालन करता हुआ मनुष्य, प्राणानुपालनात् પ્રાણનું સંરક્ષણ કરવાથી प्राणोंकी रक्षासे, दीर्घम्-आयु દીર્ઘ આયુષ્ય दीर्घ आयुको, अवाप्नोति પ્રાપ્ત કરે છે प्राप्त करता है, इति આ પ્રમાણે इस प्रकार, प्रथमा પ્રથમ प्रथम, एषणा પ્રાણૈષણા प्राणैषणा, व्याख्याता भवति કહેનામા આવી છે कह दी गई है ॥ ४ ॥

4. By following what has here been laid down, one, husbanding his vital resources, attains long life Thus the first pursuit has been dealt with

द्वितीया धनैषणा—

अथ द्वितीयां धनैषणामापद्येत, प्राणेभ्यो ह्यनन्तरं धनमेव पर्येष्टव्यं भवति, न ह्यतः पापात् पापीयोऽस्ति यदनुपकरणस्य दीर्घमायुः, तस्मादुपकरणानि पर्येष्टुं यतेत ।

अथ પ્રાણૈષણા પછી प्राणैषणाके पश्चात्, द्वितीयाम् બીજી दूसरी, धनैषणाम् ધનૈષણા धनैषणा, आपद्येत કરવી જોઈએ करनी चाहिए, हि કારણકે क्योंकि, प्राणेभ्य. अनन्तरम् પ્રાણ પછી प्राणके बाद, धनम् एव ધન જ धन ही, पर्येष्टव्यम् ઇચ્છવા યોગ્ય स्पृहणीय, भवति થાય છે होता है, यत् કારણકે क्योंकि, अनुपकरणस्य સાધન (ધન)થી રહિત હોઈ साधन (धनसे) रहित होकर, दीर्घम् आयु લાંબુ આયુષ્ય ભોગવવુ दीर्घ आयुवाला होना, अत पापात् એ દુખથી इस दुखसे, पापीय વધારે દુખ बढकर कोई दूसरा दुख, नहि अस्ति નથી नहीं है, तस्मात् માટે इस लिए, उपकरणानि સાધનો उपकरणोको, पर्येष्टुम् પ્રાપ્ત કરવા માટે प्राप्त करनेके लिए, यतेत પ્રયત્ન કરવો જોઈએ प्रयत्न करे,

5-(1). Next the pursuit of wealth should be taken up For, after life, wealth is the end to be sought Surely there is no wretchedness more wretched than that of the man possessed of long life but lacking the appurtenances that make life worth living Therefore effort should be made to acquire these appurtenances

तत्रोपकरणोपायाननुव्याख्यास्यामः, तद्यथा— कृषिपाशुपाल्यवाणिज्यराजोपसेवादीनि, यानि चान्यान्यपि सतामविगर्हितानि कर्माणि वृत्तिपुष्टिकराणि विद्यात्तान्यारभेत कर्तुं,

तत्र તે માટે इस लिए, उपकरणोपायान् ધનની પ્રાપ્તિના ઉપાયોનુ धनकी प्राप्तिके उपायोंका, अनुव्याख्यास्यामः વ્યાખ્યાન કરશુ व्याख्यान करेंगे, तद्यथा જેમકે जैसे, कृषि- ખેતી कृषि, पाशुपाल्य- પશુપાલન पशुपालन, वाणिज्य- વાણિજ્ય वाणिज्य, राजोपसेवा-आदीनि રાજસેવા વગેરે राजसेवा आदि, सताम् અને સત્પુરુષોથી और सत्पुरुषोंसे, अविगर्हितानि અનિંદિત अनिन्दित, यानि च જે जो, अन्यानि-अपि બીજા વળી दूसरे कोई, कर्माणि કર્મો कर्म, वृत्तिपुष्टिकराणि આજીવિકા અને ધનસંપત્તિ કરનારાં आजीविका और धनसंपत्ति करनेवाले, विद्यात् જણાય जाने, तानि ते उनको, कर्तुम् કરવાનો करना, आरभेत આરંભ કરવો आरम्भ करे,

5-(2) We shall indicate the means of acquiring these necessaries of life. They are agriculture, rearing of cattle, trade and service of the king, etc In addition to these, one may resort to such other occupations as, to one's knowledge, are not disapproved of by

४. भवति–भवतीति (ग)

५. अन्यान्यपि–अन्यान्यप्येवंप्रकाराणि (ग.)

the righteous and provide both livelihood and opulence.

तथा कुर्वन् दीर्घजीवितं जीवत्यनवमतः पुरुषो भवति। इति द्वितीया धनैषणा व्याख्याता भवति॥५॥

तथा તેમ उस प्रकार, कुर्वन् કરનાર करनेवाला, पुरुष પુરુષ मनुष्य, दीर्घजीवितम् દીર્ઘજીવન दीर्घजीवन, जीवति જીવે છે भोगता है, अनवमत અને સમાનિત और सम्मानित, भवति બને છે होता है, इति આ પ્રમાણે इस प्रकार, द्वितीया બીજી दूसरी, धनैषणा ધનૈષણાનુ धनैषणाका, व्याख्याता भवति વ્યાખ્યાન થયુ છે व्याख्यान हुआ है ॥ ५ ॥

5 Conducting himself in this manner, a man lives for long and with dignity Thus the second—the pursuit of wealth—has been dealt with

तृतीया परलोकैषणा—

अथ तृतीयां परलोकैषणामापद्येत। संशयश्चात्र, कथं? भविष्याम इतश्च्युता न वेति,

अथ ધનૈષણા પછી धनैषणाके पश्चात्, तृतीयाम् ત્રીજી तीसरी, परलोक-एषणाम् પરલોકૈષણા परलोकैषणा, आपद्येत કરવી જોઈએ करनी चाहिए, अत्र च આ વિષયમાં इस विषयमें, संशयः સંશય થાય છે संशय होता है, कथम् કેવા પ્રકારનો સંશય થાય છે? किस प्रकारका संशय होता है? इतश्च्युता. આ લોકમાંથી મરી ગયા પછી यहांसे मर जानेके बाद, भविष्यामः न वा इति અમારો પુનર્જન્મ થશે કે નહિ? हमारा पुनर्जन्म होगा या नहीं?

6-(1) Lastly, the third pursuit—that of the other world—should be taken up This is beset with doubt How? Thus, namely,—shall we continue to exist after we have slipped from this life or shall we not?

कुतः पुनः संशय इति, उच्यते-सन्ति ह्येके प्रत्यक्षपराः परोक्षत्वात् पुनर्भवस्य नास्तिक्यमाश्रिताः, सन्ति चागमप्रत्ययादेव पुनर्भवमिच्छन्ति; श्रुतिभेदाच्च—

'मातरं पितरं चैके मन्यन्ते जन्मकारणम्।
स्वभावं परनिर्माणं यदृच्छां चापरे जनाः॥ इति।'
अतः संशयः-किं नु खल्वस्ति पुनर्भवो न वेति॥६॥

कुतः पुनः संशयः इति આ સંશય શા માટે થાય છે? यह संशय किस लिए होता है? उच्यते એનો ઉત્તર આપવામાં આવે છે કે उसके जवाबमें कहा जाता है कि, एके हि કેટલાએક कई एक, प्रत्यक्षपरा. પ્રત્યક્ષનેજ પ્રમાણ માનનારા प्रत्यक्षवादी सन्ति છે हैं, (ये જેઓ जो), पुनर्भवस्य પુનર્જન્મના पुनर्जन्मके, परोक्षत्वात् પરોક્ષભાવથી परोक्ष होनेके कारण, नास्तिक्यम् નાસ્તિકતાનો नास्तिकताका, आश्रिता આશ્રય લે છે आश्रय लेते हैं, (अपरे च અને બીજાઓ और दूसरे), सन्ति છે हैं, (ये જેઓ जो), आगमप्रत्ययात् एव શાસ્ત્રના પ્રમાણથીજ शास्त्रके प्रमाणसे ही, पुनर्भवम् પુનર્જન્મને पुनर्भवको, इच्छन्ति માને છે मानते हैं, एके કેટલાક कई एक, मातरम् માતા माता, पितरम् च અને પિતાને और पिताको, जन्मकारणम् જન્મનુ કારણ जन्मका कारण, मन्यन्ते માને છે मानते हैं, अपरे च जना. અને બીજા મનુષ્યો તો दूसरे मनुष्यों तो, स्वभावम् સ્વભાવને स्वभावको, परनिर्माणम् ઈશ્વરના સર્જનને ईश्वरके सर्जनको, यदृच्छाम् च અને યદૃચ્છાને જન્મનુ કારણ માને છે और यदृच्छाको जन्मका कारण मानते हैं, इति એ પ્રમાણે इस तरह, श्रुति-भेदात् च ભિન્ન ભિન્ન વચનો સાંભળવાથી 'પુનર્જન્મ નથી' એમ પણ કેટલાએક માને છે लोकमें सुननेकी भिन्नतासे 'पुनर्जन्म नहीं होता' ऐसा भी कई एक मानते हैं, अतः માટે इस लिए, संशय શંકા થાય છે કે संशय होता है कि, किम्नुखलु શુ क्यों, पुनर्भव. પુનર્જન્મ पुनर्जन्म, अस्ति नवाइति છે કે નહિ? है या नहीं? ॥६॥

५ तथा कुर्वन् दीर्घजीवित जीवत्यनवमत. पुरुषो भवति-तथाति-कुर्वन् दीर्घजीवितमनवमत. पुरुषो जीवति (ध.)

,, द्वितीया धनैषणा-द्वितीयैषणा (च.)

६ सन्ति ह्येके-सन्ति चापरे (ङ)

,, चागम-स्वागम (ध)

,, चैके-चान्ये (ग)

6. But wherefore this misgiving? We shall explain. There are some who, in their exclusive idolatry of direct evidence, reject the rebirth of the spirit because it is outside sense-observation There are others who believe in the spirit's rebirth solely on the authority of scripture.

Tradition also differs on this matter. Thus some hold that the mother and father are the actual authors of one's birth; others that it is the law of Nature, some others that it is divine handiwork and still others that it is mere accident.

It is thus that doubt arises Is there, of a truth, rebirth or is there not?

आत्मपरलोकास्तित्वप्रतिपादनम्—

तत्र बुद्धिमान्नास्तिक्यबुद्धिं जह्याद्विचिकित्सां च। कस्मात्? प्रत्यक्षं ह्यल्पम्, अनल्पमप्रत्यक्षमस्ति, यदागमानुमानयुक्तिभिरुपलभ्यते, यैरेव तावदिन्द्रियैः प्रत्यक्षमुपलभ्यते, तान्येव सन्ति चाप्रत्यक्षाणि ॥ ७ ॥

तत्र તેમાં इसमें, बुद्धिमान् બુદ્ધિમાન મનુષ્યે बुद्धिमान पुरुषको, नास्तिक्य-बुद्धिम् નાસ્તિકબુદ્ધિ नास्तिक-बुद्धिको, विचिकित्साम् च તથા શંકા तथा संशयको, जह्यात् છોડી દેવાં જોઈએ छोड देना चाहिए, कस्मात् શા માટે છોડી દેવાં જોઇએ? क्यों छोड़ देना चाहिए? हि કારણકે क्योंकि, प्रत्यक्षम् પ્રત્યક્ષ તો प्रत्यक्ष तो, अल्पम् થોડું છે थोडा है, अप्रत्यक्षम् અને અપ્રત્યક્ષ और अप्रत्यक्ष, अनल्पम् अस्ति ઘણું છે अधिक है, यत् જે जो, आगम अनुमान-युक्तिभि આગમ-અનુમાન અને યુક્તિથી आगम-अनुमान तथा युक्तिद्वारा, उपलभ्यते- ગ્રહણ કરાય છે जाना जाता है, यैः एव तावत् વળી જે और जिन, इन्द्रियैः ઇન્દ્રિયોથી इन्द्रियों द्वारा, प्रत्यक्षम् उपलभ्यते પ્રત્યક્ષ કરાય છે प्रत्यक्ष जाना जाता है, तानि एव च તેઓજ वे स्वयं ही, अप्रत्यक्षाणि सन्ति અપ્રત્યક્ષ છે अप्रत्यक्ष हैं ॥ ७ ॥

7. On this question, the wise man should give up the negative attitude and even scepticism Why? Because the visible is limited; while there exists a vast unlimited world of which we know by the evidence of scripture, inference and reason As a matter of fact even the very senses by whose agency direct observations are obtained are themselves outside the range of observation.

सतां च रूपाणामतिसन्निकर्षादतिविप्रकर्षादावरणात् करणदौर्बल्यान्मनोनवस्थानात् समानाभिहारादभिभवादतिसौक्ष्म्याच्च प्रत्यक्षानुपलब्धिः;

अतिसन्निकर्षात् અતિ સામીપ્યથી अति निकट होने से, अतिविप्रकर्षात् અતિ દૂર હોવાથી अति दूर होनेसे, आवरणात् ભીંત વગેરેના આવરણથી दिवाल आदिका आवरण होनेसे, करणदौर्बल्यात् ઇન્દ્રિયોની નબળાઇથી इन्द्रियोंकी दुर्बलतासे, मनः-अनवस्थानात् મનનું ધ્યાન ન હોવાથી मनके अन्यत्र लगे होनेसे, समान-अभिहारात् સરખા રૂપરંગવાળી વસ્તુઓના પરસ્પર મળી જવાથી एक जैसी वस्तुओंके परस्पर मिलनेसे, अभिभवात् સૂર્યના પ્રકાશ વગેરેથી પરાભવ પામવાથી सूर्यके तेज आदि द्वारा अभिभूत होनेसे, अतिसौक्ष्म्यात् च અને અતિ સૂક્ષ્મતાને લઈને और अत्यन्त सूक्ष्म होनेसे, सताम् च रूपाणाम् રૂપો હોવા છતાં પણ रूपोंके होते हुए भी, प्रत्यक्ष-अनुपलब्धिः તેઓનું પ્રત્યક્ષ જ્ઞાન થતું નથી उनका प्रत्यक्ष ज्ञान नहीं होता,

8-(1) Further even a perceivable object escapes observation under the following conditions—viz., when it is either too close or too remote from the observer, when it is obstructed by other objects, when there is some defect in the perceiving sense-organ, when the observer's attention is else-

where, when the object is merged in the mass, when it is over-shadowed by something else, or, lastly, when it is microscopic.

तस्मादपरीक्षितमेतदुच्यते—प्रत्यक्षमेवास्ति; नान्यदस्तीति ॥ ८ ॥

तस्मात् તેથી इस लिए, प्रत्यक्षम् एव अस्ति કેવળ પ્રત્યક્ષ જ પ્રમાણ છે प्रत्यक्ष ही प्रमाण है, अन्यत् न अस्ति અને બીજું કાંઈ પ્રમાણ નથી और दूसरा कोई नही, इति એ यह, अपरीक्षितम् उच्यते વગર વિચારે કહેવામાં આવે છે विचार किये विना कहा जाता है ॥८॥

8 Hence it is an unfounded statement to make that only the visible exists and nothing else.

श्रुतयश्चैता न कारणं, युक्तिविरोधात् ।
आत्मा मातुः पितुर्वा यः सोऽपत्यं यदि संचरेत् ।
द्विविधं संचरेदात्मा सर्वो वाऽवयवेन वा ॥ ९ ॥
सर्वश्चेत् संचरेन्मातुः पितुर्वा मरणं भवेत् ।
निरन्तरं, नावयवः कश्चित्सूक्ष्मस्य चात्मनः ॥ १० ॥

युक्तिविरोधात् યુક્તિથી વિરુદ્ધ હોવાને લીધે युक्तिके विरुद्ध होनेसे, एताः श्रुतय च સાંભળવામાં આવેલાં આ ભિન્ન ભિન્ન વચનો પણ सुननेमें आये ये भिन्न भिन्न वचनोंमी कारणम् न પુનર્જન્મનો પ્રતિષેધ કરવામાં કારણરૂપ નથી पुनर्जन्मप्रतिषेध करनेमें कारण नहीं हैं, मातु. पितु वा માતા કે પિતાનો माता और पिताकी, य आत्मा જે આત્મા છે जो आत्मा है, सः यदि તે જો वह यदि, अपत्यम् બાળકમાં सतानमें, संचरेत् ઊતરે છે अवतरण करे, आत्मा તો તે આત્મા तो वह आत्मा, सर्व. वा આખે આખો અથવા सारे सारा अथवा, अवयवेन वा વિભાગશઃ विभागसे, द्विविधम् सचरेत् એમ બે પ્રકારે ઊતરી શકે दो प्रकारसे अवनरण कर सकता है, सर्व આખો ય આત્મા सपूर्ग रूपमे, सचरेत् चेत् ઊતરે તો अवतरण करे तो, मातु पितु वा માતા અથવા પિતાનુ माता या पिताकी, निरन्तरम् તાત્કાલિક तत्काल, मरणम् भवेत् મરણ થાય मृत्यु होनी चाहिए, सूक्ष्मस्य आत्मन અને સૂક્ષ્મ આત્માનો और सूक्ष्म आत्माका, कश्चित् કોઈ कोई, अवयवः न અવયવ નથી તેથી માતા કે પિતાના આત્માનુ સતાનમાં અવતરણ ન થઈ શકે अवयव नहीं है, इस कारणसे माता अथवा पिताकी आत्माका संतानमें अवतरण न हो सके ॥ ९–१० ॥

9-10. The various traditional beliefs referred to earlier are to be set aside as they conflict with reason.

Thus, if the soul of either the father or the mother transmigrates into the offspring, it should do so in one of two ways, viz., either totally or in part. If the transmigration were total then it should mean the immediate death of either the father or the mother As regards partial transmigration, this alternative is overruled on account of the soul being an indivisible substance.

बुद्धिर्मनश्च निर्णीते यथैवात्मा तथैव ते ।
येषां चैषा मतिस्तेषां योनिर्नास्ति चतुर्विधा ॥ ११ ॥

बुद्धि બુદ્ધિ बुद्धि, मन च તથા મનનો और मनका, निर्णीते નિર્ણય થઈ ગયો છે કે निर्णय हो गया है कि, यथा एव आत्मा જેવો આત્મા નિરવયવ છે जैसा ही आत्मा निरवयव है, तथा एव ते તેવાં જ તેઓ છે તેથી માતા કે પિતાની બુદ્ધિ અથવા માતા કે પિતાનું મન સતાનમાં ઊતરે છે એમ પણ નહિ કહી શકાય वैसे ही वे हैं इसलिए माता अथवा पिताकी बुद्धि या माता अथवा पिताका मन सतानमें अवतरण करता है यह भी नही कहा जा सकता, येषाम् च एषा मति. ‘માતા તથા પિતા જ સતાનમાં ચૈતન્યનુ કારણ છે’ આ જેઓનો મત છે ‘माता व पिता ही संतानमें चैतन्यका कारण है’ यह जिनका मत है, तेषाम् તેઓના મતમાં उनके मतमें, चतुर्विधा જરાયુજ–અણ્ડજ–સ્વેદજ અને ઉદ્ભિજ્જ जरायुज-अण्डज-स्वेदज और उद्भिज्ज, चतुर्विधा એ ચાર પ્રકારની इन चार प्रकारकी, योनिः યોનિ योनि, न अस्ति થશે નહિ પરંતુ જરાયુજ અને

९. प्रत्यक्षानुपलब्धिः—प्रत्यक्षस्य अनुपलब्धि. (ग.)

अङ्कुर એમ બે પ્રકારની જ થશે કારણ કે માંકડ વગેરે સ્વેદજ તથા અળસિયાં વગેરે ઉદ્ભિજ્જ જંતુઓની ઉત્પત્તિ માતા તથા પિતાથી થતી નથી नहीं होगी, परंतु जरायुज व अण्डज इन दो प्रकारकी होगी, क्योंकि खटमल आदि स्वेदज और गण्डूपद आदि उद्भिज्ज जन्तुओंकी उत्पत्ति माता व पितासे नहीं होती ॥११॥

11. Since the intellect and the mind are as indivisible as the soul, the same objection as that set out in the case of the soul's transmigration applies in their case also Besides, according to the parental theory, there could be no possibility of the four-fold method of generation (which is an observed fact in Nature)

विद्यात् स्वाभाविकं षण्णां धातूनां यत् स्वलक्षणम् ।
संयोगे च वियोगे च तेषां कर्मैव कारणम् ॥ १२ ॥

षण्णाम् धातूनाम् પંચમહાભૂત અને આત્મા એ છ યે ધાતુઓના पृथ्वी आदि पचमहाभूत और आत्मा इन छः धातुओंके, यत् स्वलक्षणम् જે પોતાનાં લક્ષણો છે जो अपने लक्षण है, स्वाभाविकम् તેઓને સ્વાભાવિક उन्हें स्वाभाविक, विद्यात् જાણવાં जानने चाहिए, तेषाम् તેઓના इन छ धातुओंके, सयोगे च સંયોગમાં सयोगमें, वियोगे च અને વિયોગમાં और वियोगमें, कर्म एव કર્મ જ कर्म ही, कारणम् કારણ છે कारण है ॥ १२ ॥

12 In reply to those who maintain that life is a natural phenomenon (needing no extraneous causation) we say that only that is natural which is innate, like the unique characteristics of the six elements. There can be no life unless these come together and in all operations of conjunction and disjunction, the sole factor is antecedent action (which is not accounted for in the Nature theory).

अनादेश्चेतनाधातोर्नेष्यते परनिर्मितिः ।
पर आत्मा स चेद्धेतुरिष्टोऽस्तु परनिर्मितिः ॥ १३ ॥

अनादेः અનાદિ अनादि, चेतनाधातोः આત્માની आत्माकी, परनिर्मितिः બીજાથી ઉત્પત્તિ दूसरेसे उत्पत्ति, न इष्यते ઇષ્ટ નથી इष्ट नही है, स पर. आत्मा તે ઈશ્વર वह ईश्वर, हेतु કારણરૂપ कारणरूप, इष्ट चेत् જો માન્ય હોય તો मान्य हो तो, परनिर्मितिः શરીરની ઈશ્વરથી ઉત્પત્તિ शरीरकी ईश्वरसे उत्पत्ति, अस्तु ભલે થાય हमें भी मान्य हैं ॥ १३ ॥

13 The element of consciousness (the soul) which is beginningless, cannot be the product of anything. If what is meant is that the soul itself is the ultimate cause of everything else, then we have no quarrel with the theory of "Divine Handiwork".

न परीक्षा न परीक्ष्य न कर्ता कारणं न च ।
न देवा नर्षयः सिद्धाः कर्म कर्मफलं न च ॥ १४ ॥
नास्तिकस्यास्ति नैवात्मा यदृच्छोपहतात्मनः ।
पातकेभ्यः परं चैतत् पातकं नास्तिकग्रहः ॥ १५ ॥

यदृच्छा-उपहत आत्मन. યદૃચ્છાવાદથી હણાયેલી બુદ્ધિવાળા यदृच्छासे मारी गई बुद्धिवाले, नास्तिकस्य નાસ્તિકને તો नास्तिकके लिए. परीक्षा न પરીક્ષા હોતી નથી परीक्षा नहीं होती, परीक्ष्यम् न પરીક્ષા યોગ્ય હોતું નથી परीक्षा करने योग्य नहीं होता, कर्ता न કોઈ કર્તા નથી कोई कर्ता नहीं होता, देवाः न દેવો નથી देवो नहीं हैं, ऋषय सिद्धा न ઋષિઓ અને સિદ્ધો નથી ऋषि एव सिद्धलोक नहीं हैं, कर्म કર્મ कर्म कर्मफलम् च અને કર્મોનું ફળ और कर्मोंका फल, न નથી नहीं होता, आत्मा न

१२ वियोगे–विभगे (च)

१२. एतच्छ्लोकादनन्तरम्—
सस्वेदजानि भूतानि दृश्यन्ते हि महस्रश. ।
सद्भिश्च नियता लोके भूतयोनिश्चतुर्विधा ॥ (प)

१३ पर आत्मा–परमात्मा (ग)
,, इष्टोऽस्तु–इष्टाऽस्तु (क)
,, ,, –इष्टेऽस्ति (घ.)
१४. न परीक्ष्यम्–नो परीक्ष्यम् (ग)

एव આત્મા છે જ નહિ आत्मा होता ही नहीं, नास्तिकग्रह. च આવા પ્રકારનો નાસ્તિકવાદ इस प्रकारका नास्तिकवाद, एतत् આ यह, पातकेभ्य સર્વ પાપોમાં सब पापोंमें, परम् पातकम् મોટું પાપ છે बडा पाप है ॥ १४-१५ ॥

14-15. In the creed of the nihilist, whose understanding is obscured by the theory of accident, there can be no investigation, no data to be investigated, no agent, no cause, no gods, no seers, no adepts, no action, no fruit of actions, and of course, no soul. Surely this nihilistic persuasion is the most sinful of all sins.

तस्मान्मतिं विमुच्यैताममार्गप्रसृतां बुधः ।
सतां बुद्धिप्रदीपेन पश्येत्सर्वं यथातथम् ॥ १६ ॥

तस्मात् તે માટે इस लिए, बुध ડાહ્યા માણસે बुद्धिमान पुरुष, अमार्ग-प्रसृताम् વિમાર્ગગામી विपरीत मार्गमें फैली हुई, एताम् આવા પ્રકારની ऐसी, मतिम् બુદ્ધિને बुद्धिको, विमुच्य છોડીને छोडकर, सताम् આસ્તિક મનુષ્યોના आस्तिक मनुष्योंके, बुद्धि-प्रदीपेन બુદ્ધિરૂપ દીવાથી बुद्धिरूप दीपकसे, सर्वम् સર્વનું सबका, यथातथम् યથાર્થજ્ઞાન यथार्थज्ञान, पश्येत् પ્રાપ્ત કરવું प्राप्त करे ॥१६॥

16 Hence the wise man should give up this iniquitous creed, and, by recourse to the lamp of the wisdom of the saints, strive to see all things in their true nature.

परीक्षायाश्चातुर्विध्यम्—

द्विविधमेव खलु सर्वं सच्चासच्च; तस्य चतुर्विधा परीक्षा—आप्तोपदेशः, प्रत्यक्षम्, अनुमानं, युक्तिश्चेति ॥ १७ ॥

सर्वम् खलु આ સઘળું यह सब, सत् च સત્ (અસ્તિત્વવાળું) सत् (अस्तित्ववाला), असत् च અને અસત્ (અસ્તિત્વના અભાવવાળું) और असत् (अस्तित्वका अभाववाला), द्विविधम् एव એમ બે પ્રકારનું છે ऐसे दो प्रकारका है, तस्य તેને જાણવાનાં उसे जाननेके लिए, आप्तोपदेश આપ્તોપદેશ आप्तोपदेश, प्रत्यक्षम् પ્રત્યક્ષ प्रत्यक्ष, अनुमानम् અનુમાન अनुमान, युक्ति च અને યુક્તિ और युक्ति इति એ ये, चतुर्विधा ચાર પ્રકારનાં चार प्रकारके, परीक्षा પ્રમાણો છે प्रमाणों हैं ॥ १७ ॥

17. Everything falls into one or the other of the two categories—true and untrue. The method of investigation is fourfold. authoritative testimony, direct observation, inference and reason.

आप्तस्य लक्षणम्—

आप्तास्तावत्—

रजस्तमोभ्यां निर्मुक्तास्तपोज्ञानबलेन ये ।
येषां त्रिकालममलं ज्ञानमव्याहतं सदा ॥ १८ ॥
आप्ताः शिष्टा विबुद्धास्ते तेषां वाक्यमसंशयम् ।
सत्यं, वक्ष्यन्ति ते कस्मादसत्यं नीरजस्तमा ॥ १९ ॥

आप्ताःतावत् આપ્તજનો આવા હોય છે आप्तपुरुषो ऐसे होते हैं, तप-ज्ञान-बलेन તપ અને જ્ઞાનના બળથી तप एव ज्ञानके बलसे, ये જેઓ जो, रज-तमोभ्याम् રજોગુણ અને તમોગુણથી रज एवं तमसे, निर्मुक्ताः સંપૂર્ણ મુક્ત હોય છે सर्वथा मुक्त हो गये हैं, येषाम् અને જેઓનું और जिनका, अमलम् નિર્મળ निर्मल, ज्ञानम् જ્ઞાન ज्ञान, सदा હમેશાં हमेशके लिए, त्रिकालम् ત્રણે કાળમાં तीनों कालोंमें, अव्याहतम् અબાધિત છે अप्रतिहत है, ते आप्ता તેઓ આપ્ત છે वे ही आप्त हैं, शिष्टाः विबुद्धाः તેઓ શિષ્ટ છે અને વિબુદ્ધ પણ છે वेही शिष्ट हैं एवं विबुद्ध भी हैं, तेषाम् वाक्यम् તેઓનું વાક્ય उनका वाक्य, असंशयम् સંશયરહિત संशयरहित, सत्यम् અને સત્ય હોય છે और सत्य होता है, नीरजस्तमा સર્વથા રજોગુણથી રહિત એવા તેઓ सर्वथा रजोगुणसे रहित ऐसे वे, कस्मात् શા માટે किस लिए, असत्यम् અસત્યને असत्य, वक्ष्यन्ति બોલે कहेंगे ॥ १८-१९ ॥

18-19 The authorities are— Men who have freed themselves from passion and ignorance by means

१९ कस्मादसत्यं नीरजस्तमा—कस्मान्नीरजस्तमसो मृषा (ग.)

of spiritual endeavour and knowledge, whose understanding, embracing the past, present and future, is pure and at all times unclouded—it is these that are the authoritative, the learned, the enligtened, their word is unimpeachable and true. Why will such men, devoid as they are of passion and ignorance, give utterance to untruth ?

प्रत्यक्षस्य लक्षणम्—

आत्मेन्द्रियमनोर्थानां सन्निकर्षात् प्रवर्तते ।
व्यक्ता तदात्वे या बुद्धिः प्रत्यक्षं सा निरुच्यते ॥२०॥

आत्मा इन्द्रिय-मनः-अर्थानाम् આત્મા-ઇન્દ્રિયો-મન અને વિષયોના आत्मा-इन्द्रियां मन और विषयोंके, सन्निकर्षात् સંબંધથી सम्बन्धसे, तदात्वे તે ક્ષણે तत्कालमें, व्यक्ता નિશ્ચયાત્મક निश्चयात्मक, या-बुद्धि જે જ્ઞાન जो ज्ञान, प्रवर्तते પ્રવૃત્ત થાય છે प्रवृत्त होता है, सा તે वह, प्रत्यक्षम् પ્રત્યક્ષ प्रत्यक्ष, निरुच्यते કહેવાય છે कहा जाता है ॥ २० ॥

20 Preception or observation is defined as the cognition, definite and immediate, arising from the conjunction of the soul, the senses, the mind and the sense objects.

अनुमानस्य लक्षणम्—

प्रत्यक्षपूर्वं त्रिविधं त्रिकालं चानुमीयते ।
वह्निर्निगूढो धूमेन मैथुनं गर्भदर्शनात् ॥२१॥
एवं व्यवस्यन्त्यतीतं बीजात् फलमनागतम् ।
दृष्ट्वा बीजात् फलं जातमिहैव सदृशं बुधाः ॥२२॥

प्रत्यक्षपूर्वम् પ્રત્યક્ષપૂર્વક प्रत्यक्षपूर्वक, त्रिविधम् ત્રણ પ્રકારનું तीन प्रकारका, त्रिकालम् च અને ત્રણે કાળનું और तीन कालका, अनुमीयते અનુમાન કરાય છે अनुमान किया जाता है, धूमेन ધૂમાડાના દર્શનથી વર્તમાન કાલના धूमके दर्शनसे वर्तमान कालकी, निगूढ वह्नि છુપાયેલા અગ્નિનું छीपी हुई अग्निका, गर्भदर्शनात् અને ગર્ભદર્શનથી और गर्भदर्शनसे, मैथुनम् અતીત મૈથુનનું અનુમાન કરાય છે अतीत मैथुनका अनुमान करते हैं, एवम् એ પ્રમાણે એવી, अतीतम् અતીત કાળનું જ્ઞાન अतीत कालका ज्ञान, व्यवस्यन्ति અનુમાનથી પ્રાપ્ત કરે છે अनुमानसे प्राप्त करते हैं, बुधाः બુદ્ધિમાન પુરુષો बुद्धिमान पुरुषों, इह एव અહીંજ यहां ही, बीजात् બીજથી बीजसे, जातम् ઉત્પન્ન થયેલા उत्पन्न हुए, फलम् ફળને फलको, दृष्ट्वा જોઈને देखकर, अनागतम् ભવિષ્યમાં થનારા भावी, फलम् ફળનો फलको, सदृशम् 'એ જોયેલા ફળ જેવું થશે' એવો નિશ્ચય કરે છે 'वह देखे हुए फलके सदृश होगा' ऐसा निश्चय करते हैं ॥ २१-२२ ॥

21-22. Inference is that which, having its basis in observation, enables one to conclude in three several ways and with reference to all the three sections of time Thus we infer the unseen fire from the observed smoke as also (the past act of) mating from the (present) signs of pregnancy. In this manner the wise infer the past from the present, the unborn fruit from the seed, having observed the fact that fruit is like unto the seed

युक्तेर्लक्षणम्—

जलकर्षणबीजर्तुसंयोगात् सस्यसंभवः ।
युक्तिः षड्धातुसंयोगाद्गर्भाणां संभवस्तथा ॥२३॥
मथ्यमन्थन(क)मन्थानसंयोगादग्निसंभवः ।
युक्तियुक्ता चतुष्पादसंपद्व्याधिनिबर्हणी ॥२४॥

जल-कर्षण बीज-ऋतु संयोगात् જે પ્રમાણે પાણી-ખેડેલી જમીન બીજ અને યોગ્ય ઋતુના સંયોગથી जिस प्रकार जल-जोती हुई भूमि-बीज और ऋतुके संयोगसे, सस्य-संभव અનાજ ઉત્પન્ન થાય છે अन्न उत्पन्न होता है, तथा તે પ્રમાણે उसी प्रकार, षट्-धातु-संयोगात् પૃથ્વી વગેરે ૭ ધાતુઓના સંયોગથી पृथ्वी आदि इन छ धातुओंके संयोगसे, गर्भाणाम् ગર્ભોની गर्भोंकी, संभव ઉત્પત્તિ થાય છે उत्पत्ति होती है, युक्ति આ યુક્તિ કહેવાય છે यह युक्ति कहाती है, मथ्य-मन्थन-मन्थान-संयोगात् જેમ મથ્ય મન્થન અને મન્થાનના સંયોગથી

जैसे मथ्य-मन्थन और मन्थानके सयोगसे, अग्नि-संभव અગ્નિ ઉત્પન્ન થાય છે अग्नि उत्पन्न होती है, युक्ति-युक्ता તેમ યુક્તિપૂર્વક યોજાએલી युक्तिपूर्वक योजनावाली, चतुष्पाद-संपत् ચિકિત્સાના ચાર પાદોની સંપત્તિ चिकित्साके चारों पादोकी सपत्ति, व्याधि-निबर्हणी રોગને શાન્ત કરે છે रोगको शान्त करती है ॥ २३–२४ ॥

23-24. That is the reason by which we form such judgements as the following –From the conjoint operation of water, tillage, seed-sowing and season, the crop will spring up, from the coming together of the five proto-elements and the soul (the sixth element) the embryo will take its rise; from the operations of the fire-drill the fire will burst forth, from the excellent four basic factors of treatment, when these are rightly linked together, the cure of the disease will proceed.

बुद्धिः पश्यति या भावान् बहुकारणयोगजान् ।
युक्तिस्त्रिकाला सा ज्ञेया त्रिवर्गः साध्यते यया ॥२५॥

या बुद्धिः જે બુદ્ધિ जो बुद्धि, बहुकारण-योगजान् ઘણી ઉપપત્તિઓના યોગથી જાણવામાં આવતા बहुत उपपत्तिके योगसे जाननेमें आते, भावान् ભાવોનો विषयोंका, पश्यति તર્ક કરે ऊह करती है, यया અને જે બુદ્ધિવડે जिस बुद्धिके द्वारा, त्रिवर्ग ધર્મ- અર્થ તથા કામ धर्म- अर्थ और काम, साध्यते સાધી શકાય છે सिद्ध हो सकते हैं, सा ते उस, त्रिकाला ત્રણ કાળના અનુમાનના વિષયને સમજાવનારી બુદ્ધિને तीनो कालके अनुमानके विषयको समझानेवाली बुद्धिको, युक्ति યુક્તિ युक्ति, ज्ञेया જાણવી जाननी चाहिए ॥ २५ ॥

25. That faculty of the mind which assesses the contribution of the various factors at work in a given case and which takes into account the past, the present and the future, is to be known as reason It is by the exercise of reason that the three ends of man (virtue, wealth and happiness) are achieved.

२५ बहु–बहून् (ग)

प्रमाणप्रकरणोपसंहारः—

एषा परीक्षा नास्त्यन्या यया सर्वं परीक्ष्यते ।
परीक्ष्यं सदसच्चैवं तया चास्ति पुनर्भवः ॥२६॥

एषा આ પ્રમાણે ચાર પ્રકારની यही चार प्रकारकी परीक्षा પરીક્ષા છે परीक्षा है, अन्या न अस्ति બીજી કોઈ પરીક્ષા નથી अन्य कोई परीक्षा नहीं है, यया જેથી जिससे, सत्-असत् च સત્ તથા અસત્ एवम् એમ ऐसे, सर्वम् સર્વ सब, परीक्ष्यम् પરીક્ષા કરવા યોગ્ય પદાર્થની परीक्षा करने योग्य पदार्थकी, परीक्ष्यते પરીક્ષા કરવામાં આવે છે परीक्षा करनेमे आती है, तया च અને તે પરીક્ષાથી और इस परीक्षासे, पुनर्भव પુનર્જન્મ पुनर्जन्म, अस्ति સિદ્ધ થાય છે सिद्ध होता है ॥ २६ ॥

26 These four methods—and there is none other left–constitute the means of proof by which all things, whether true or false, are examined Judged by them, rebirth does exist.

आप्तवाक्यद्वारा पुनर्भवस्य प्रतिपादनम्—

तत्राप्तागमस्तावद्वेदः, यश्चान्योऽपि कश्चिद्वेदार्थादविपरीतः परीक्षकैः प्रणीतः शिष्टानुमतो लोकानुग्रहप्रवृत्तः शास्त्रवादः, स चाऽऽप्तागमः;

तत्र તેમાં इनमें, आप्तागम तावत् આપ્ત શાસ્ત્ર आप्त शास्त्र, वेद વેદ છે वेद है, य च અને જે और जो, अन्य બીજો दूसरा, कश्चित् अपि કોઈ પણ कोई भी, शास्त्रवादः શાસ્ત્રવાદ शास्त्रवाद, वेदार्थात् વેદના અર્થથી वेदार्थसे, अविपरीत વિરુધ્ધ ન હોય विरुद्ध न हो, परीक्षकै. प्रणीत પરીક્ષકોએ રચેલો હોય परीक्षकों द्वारा

२६ यया सर्वम्–यथा सर्वम् (ठ)
२७ तत्राप्तागम.–आप्तागम (ध)

रचा गया हो, शिष्ट-अनुमत શિષ્ટ પુરુષોએ અનુમોદન આપેલો હોય शिष्ट पुरुषोंसे अनुमोदित हुआ हो, लोकानुग्रह प्रवृत्त અને જે લોકો પર અનુગ્રહની દૃષ્ટિથી રચાયો હોય और जो लोगों पर अनुग्रहकी दृष्टिसे बनाया गया हो, स. च તેને પણ उसे भी, आप्तागमः આપ્તાગમ જાણવો आप्तागम जानना चाहिए,

27-(1). Now the dignity of authoritative testimony belongs in the first place to the Vedas. It has been enlarged to include all such other writings as are not against the trend of the Vedas and have been compiled by scientific investigators and are for the good of the world and have been accepted by men of good-will everywhere. These, too, constitute authoritative testimony

आप्तागमादुपलभ्यते—दानतपोयज्ञसत्याहिंसाब्रह्मचर्याण्यभ्युदयनिःश्रेयसकराणीति ॥ २७ ॥

आप्तागमात् આપ્તજનોએ રચેલા આગમથી आप्तागमसे, उपलभ्यते જાણવામાં આવે છે કે जाना जाता है कि, दान-तप -यज्ञ-सत्य-अहिंसा-ब्रह्मचर्याणि દાન-તપ-યજ્ઞ સત્ય-અહિંસા અને બ્રહ્મચર્ય दान तप-यज्ञ-सत्य-अहिंसा और ब्रह्मचर्य, अभ्युदय-निःश्रेयसकराणि इति અભ્યુદય અને મોક્ષને આપનારા છ अभ्युदय और निःश्रेयसके देने वाले हैं ॥ २७ ॥

27. From such authoritative testimony we learn that charity, austerities, sacrifices, truthfulness, practice of non-violence and Brahmacharya are the means of attaining exaltation and final emancipation.

न चानतिवृत्तसत्त्वदोषाणामदोषैरपुनर्भवो धर्मद्वारेषूपदिश्यते ॥ २८ ॥

अदोषैः च અને દોષરહિત મહર્ષિઓથી और दोषोंसे रहित महर्षियोंसे, धर्मद्वारेषु ધર્મશાસ્ત્રોમાં धर्मशास्त्रोंमें, अनतिवृत्तसत्त्व-दोषाणाम् જે પુરુષોના માનસ દોષોની શાન્તિ નથી થઈ તેવાઓને માટે जिन पुरुषोंके मानसिक दोषों शान्त न हुए हों वैसे पुरुषोंके लिए, अपुनर्भव મોક્ષનો मोक्षका, न उपदिश्यते ઉપદેશ કરવામા આવતો નથી उपदेश नहीं किया जाता ॥ २८ ॥

28. Further, exemption from recurrent birth is not promised by the blameless promulgators of the scriptural texts to any but those that have won release from spiritual failings etc

धर्मद्वारावहितैश्च व्यपगतभयरागद्वेषलोभमोहमानैर्ब्रह्मपरैराप्तैः कर्मविद्भिरनुपहतसत्त्वबुद्धिप्रचारैः पूर्वैः पूर्वतरैर्महर्षिभिर्दिव्यचक्षुर्भिर्दृष्ट्वोपदिष्टः पुनर्भव इति व्यवस्येदेवम् ॥ २९ ॥

धर्मद्वार-अवहितै ધર્મશાસ્ત્રમાં તત્પર धर्मादि कार्योंमें तत्पर, व्यपगत-भय-राग द्वेष-लोभ मोह-मानै જેઓનાં ભય-રાગ-દ્વેષ-લોભ-મોહ અને માન દૂર થયાં છે તેવા जिनके भय-राग-द्वेष-लोभ-मोह और देहाभिमान नष्ट हो गये हैं, ब्रह्मपरैः બ્રહ્મચિન્તનમા પરાયણ अध्यात्मज्ञानमें तत्पर, आप्त આપ્ત પુરુષોએ आप्तजनोंने, कर्मविद्भिः અને કર્મોને જાણનાર और कर्मके जाननेवाले, अनुपहत-सत्त्वबुद्धि-प्रचारैः તથા અખંડિત સત્ત્વગુણયુક્ત બુદ્ધિના પ્રચારવાળા और अखण्डित सत्त्वगुणयुक्त बुद्धिके प्रचारवाले, दिव्यचक्षुर्भिः દિવ્ય દૃષ્ટિવાળા दिव्य चक्षुवाले, पूर्वैः પ્રાચીન पूर्वकालके, पूर्वतरं च અને તેથી પણ પૂર્વના और अधिक पूर्वकालके, महर्षिभि મહર્ષિઓએ महर्षिओंने, दृष्ट्वा જાતે અનુભવ કરી स्वय अनुभव करके, पुनर्भव. પુનર્જન્મ पुनर्जन्म,उपदिष्ट. કહ્યો છે कहा है, इति આ પ્રમાણે इस प्रकार, एवम् આગમ દ્વારા आगमद्वारा, व्यवस्येत् પુનર્જન્મ છે એમ નિર્ણય કરવો पुनर्जन्म है ऐसा निश्चय जाने ॥ २९ ॥

29 Therefore the believers in scriptural texts should consider re birth as established truth in confor-

२७ दानतपोयज्ञसत्याहिंसाब्रह्मचर्याणि—दान तपो यज्ञ. सत्यमहिंसा ब्रह्मचर्यमिति (ग.)

२९. भव इति—भवोऽस्तीति (ग.)

अमलतास, तीक्ष्णविरेचनानाम् તીક્ષ્ણ વિરેચનોમાં तीक्ष्ण विरेचनोंमें, स्नुक्पय થોરનુ દૂધ थूहरका दूध, शिरोविरेचनानाम् શિરોવિરેચનોમાં शिरोविरेचनोंमें, प्रत्यक्पुष्पा અઘેડો अपामार्ग, क्रिमिघ्नानाम् કૃમિનાશકોમાં कृमिनाशकोंमें, विडङ्गम् વાવડિંગ वायविडंग, विषघ्नानाम् વિષનાશકોમાં विषनाशकोंमें, शिरीष શિરીષ शिरीष, कुष्ठघ्नानाम् કુષ્ઠનાશકોમાં कुष्ठनाशकोंमें, खदिरः ખેર खैर, वातहराणाम् વાત હરનારાંઓમાં वात हरनेवालोंमें, रास्ना રાસ્ના रास्ना, वयःस्थापनानाम् વયસ્થાપન કરનારાંઓમાં वयको स्थापन करनेवालोंमें, आमलकम् આમળાં आवला, पथ्यानाम् પથ્ય દ્રવ્યોમાં पथ्य द्रव्योंमें, हरीतकी હરડે हरड, वृष्यवातहराणाम् વૃષ્ય અને વાતહર દ્રવ્યોમાં वृष्य और वातहर द्रव्योंमें, एरण्डमूलम् એરંડાનુ મૂળ एरडका मूल, दीपनीय- દીપનીય दीपनीय, पाचनीय પાચનીય पाचनीय, आनाहप्रशमनानाम् અને આનાહ-પ્રશામકોમાં और आनाह-प्रशामकोंमें, पिप्पलीमूलम् પીપરીમૂળ पिप्पलीमूल, दीपनीय- દીપનીય दीपनीय, पाचनीय- પાચનીય पाचनीय, गुदशोथ- તથા ગુદાનો સોજો एव गुदाकी सूजन, अर्श- હરસ बवासीर, शूल- અને શૂળ और शूल, हराणाम् હરનારાંઓમાં हरनेवालोंमें, चित्रकमूलम् ચિત્રકમૂળ चित्रकमूल, हिक्का- હેડકી हिक्का, श्वास- શ્વાસ श्वास, कास- ખાંસી खासी, पार्श्वशूल- અને પાર્શ્વશૂળ और पार्श्वशूल, हराणाम् હરનારાંઓમાં हरनेवालोंमें, पुष्करमूलम् પુષ્કરમૂળ पोहकरमूल, सांग्राहिक- સંગ્રાહક संग्राहक, दीपनीय- દીપનીય दीपनीय, पाचनीयानाम् અને પાચનીયોમાં और पाचनीयोंमें, मुस्तम् મોથ मोथा, निर्वापण- નિર્વાપણ निर्वापण, दीपनीय- દીપનીય दीपनीय, पाचनीय- પાચનીય पाचनीय, छर्दि- તથા ઉલટી एवं कै, अतिसार- અને ઝાડા और दस्त, हराणाम હરનારાંઓમાં हरनेवालोंमें, उदीच्यम् સુગંધી વાળો खस, सांग्राहिक- સંગ્રાહક संग्राहक, पाचनीय- પાચનીય पाचनीय, दीपनीयानाम् તથા દીપનીયોમાં और दीपनीयोंमें, कट्वङ्गम् શ્યોનાક अरलू, सांग्राहिक- સંગ્રાહક संग्राहक, रक्तपित्त- તથા રક્તપિત્તને और रक्तपित्तको, प्रशमनानाम् શાંત કરનારાંઓમાં शात करनेवालोंमें, अनन्ता અનન્તમૂળ अनन्तमूल, सांग्राहिक સંગ્રાહક संग्राहक, वातहर- વાતહર वातहर, दीपनीय- દીપનીય दीपनीय, श्लेष्म- કફ कफ, शोणित રક્ત रक्त, विबन्ध- તથા વિબંધનુ और विबंधको, प्रशमनानाम् શમન કરનારાંઓમાં शमन करनेवालोंमें, अमृता ગળો गिलोय, सांग्राहिक- સંગ્રાહક संग्राहक, दीपनीय- દીપનીય दीपनीय, वात- તથા વાત एवं वात, कफ- અને કફનુ और कफको, प्रशमनानाम् પ્રશમન કરનારાંઓમાં शमन करनेवालोंमें, बिल्व બીલું बेल, दीपनीय- દીપનીય दीपनीय, पाचनीय- પાચનીય पाचनीय, सांग्राहिक- સંગ્રાહક संग्राहक, सर्वदोषहराणाम् તથા સર્વદોષ હરનારાંઓમાં एव सर्वदोष हरनेवालोंमें, अतिविषा અતિવિષ अतीस, सांग्राहिक- સંગ્રાહક संग्राहक, रक्तपित्त- તથા રક્તપિત્તને एवं रक्तपित्तको, प्रशमनानाम् શાંત કરનારાંઓમાં शान्त करनेवालोंमें, उत्पल- ઉત્પલ उत्पल, कुमुद- કુમુદ कुमुद, पद्म- તથા કમળનાં एव कमलके, किञ्जल्क- કેશર केशर, पित्त- પિત્ત पित्त, कफ- તથા કફને एवं कफको, प्रशमनानाम् શાંત કરનારાંઓમાં शान्त करनेवालोंमें, दुरालभा જવાસો जवासा, शोणितपित्त- રક્તપિત્તનો रक्तपित्तका, अतियोग- અતિયોગનુ अतियोगका, प्रशमनानाम् પ્રશમન કરનારાંઓમાં प्रशमन करनेवालोंमें, गन्धप्रियङ्गु ગંધપ્રિયંગુ गन्धप्रियङ्गु, श्लेष्म- કફ कफ, पित्त- પિત્ત पित्त, रक्त- તથા રક્તને तथा रक्तको, सांग्राहिक- રોકનારાંઓ संग्राहक, उपशोषणानाम् અને એઓનું શોષણ કરનારાંઓમાં और इनका शोषण करनेवालोंमें, कुटजत्वक् કડાછાલ कुडेकी छाल, रक्तसांग्राहिक- રક્તસંગ્રાહક रक्तसंग्राहक, रक्तपित्त- અને રક્તપિત્ત और रक्तपित्तको, प्रशमनानाम् શમન કરનારાંઓમાં शमन करनेवालोंमें, काश्मर्यफलम् ગંભારીનુ ફળ गम्भारीका फल, सांग्राहिक- સંગ્રાહક संग्राहक, वातहर- વાતહર वातहर, दीपनीय- દીપનીય दीपनीय, वृष्याणाम् અને વૃષ્યોમાં और वृष्योंमें, पृश्निपर्णी પૃશ્નિપર્ણી पृश्निपर्णी, वृष्य- વૃષ્ય वृष्य, सर्वदोषहराणाम् તથા સર્વદોષ હરનારાંઓમાં और सर्वदोष हरनेवालोंमें, विदारिगन्धा શાલપર્ણી शालपर्णी, सांग्राहिक- સંગ્રાહક संग्राहक, बल्य- બલને વધારનારાંઓ बल बढानेवालों, वातहराणाम् અને વાત હરનારાંઓમાં और वातहरनेवालोंमें, बला બલા સર્વથી શ્રેષ્ઠ છે बला सबसे श्रेष्ठ है,

40-(2). The emetic nut among those used in emesis and corrective and unctuous enemata; the turpeth among those that are easeful purgatives; the purging cassia among those that are mild purgatives, the milk of the thorny milk-hedge plant among those that are strong purgatives, the rough chaff among all those that are errhines; the embelia among all anthelmintics; the *s*irisha among antidotes; the catechu among dermic remedies; indian groundsel among those that are curative of vata, the emblic myrobalan among all those that are rejuvenators; the chebulic myrobalan among wholesome articles; the root of the castor-oil plant among those that promote virility and alleviate vata, the root of long pepper among digestive stimulants that are digestive and curative of constipation, the root of white-flowered lead-wort among digestive stimulants, digestives and curatives of appetite and digestion, and curatives of proctitis, piles and colic; orris root among those that are curative of hiccup, dyspnea and pleurodynea; the nut-grass among those that are astringent and digestive stimulants and digestives; fragrant sticky mallow among those that are refrigerant, digestive-stimulants, digestives and curatives of vomiting and diarrhoea; tree of heaven among those that are astringent, digestive-stimulants and digestives. Indian sarsaparilla among those that are astringent and curative of hemothermia; guduch among those that are astringent, curative of vata, digestive-stimulants and curative of inspissation of kapha and blood; the bael among those that are astringent, digestive-stimulants, and curative of vata and kapha; the atees among those that are digestive stimulants, digestives, astringents and curatives of all disorders; the pollen of the blue and the white water lilies among those that are astringent and curative of hemothermia; the cretan prickly clover among those that are curative of pitta and kapha, the perfumed cherry among those that alleviate the plethoric condition of blood and pitta, the kurchi bark among astringents and desiccants of kapha, pitta and the blood, the fruit of the white teak among hemostatics and curatives of hemothermia; the painted-leaved uraria among those that are astringents, sedatives of vata, digestive-stimulants and aphrodisiacs; the tick-trefoil among aphrodisiacs and curatives of all disorders; the heart-leaved sida among astringents, promoters of strength and curatives of vata.

गोक्षुरको मूत्रकृच्छ्रानिलहराणां, हिङ्गुनिर्यासश्छेदनीयदीपनीयानुलोमिकवातकफप्रशमनानाम्, अम्लवेतसो भेदनीयदीपनीयानुलोमिकवातश्लेष्महराणां, यावशूकः स्रंसनीयपाचनीयार्शोघ्नानां,

---

४० गोक्षुरको मूत्रकृच्छ्रा°–गोक्षुरको वस्त्यमूत्रकृच्छ्रा° (च छ)

,, दीपनीयानुलोमिक°–दीपनीयभेदनीयानुलोमिक° (च द)

तक्राभ्यासो ग्रहणीदोषशोफार्शोघृतव्यापत्प्रशमनानां, क्रव्यान्मांसरसाभ्यासो ग्रहणीदोषशोषार्शोघ्नानां, क्षीरघृताभ्यासो रसायनानां, समघृतसक्तुप्राशाभ्यासो वृष्योदावर्तहराणां, तैलगण्डूषाभ्यासो दन्तबलरुचिकराणां, चन्दनं दुर्गन्धहरदाहनिर्वापणलेपनानां, रास्नागुरुणी शीतापनयनप्रलेपनानां, लामज्जकोशीरं दाहत्वग्दोषस्वेदापनयनप्रलेपनानां, कुष्ठं वातहराभ्यङ्गोपनाहोपयोगिनां, मधुकं चक्षुष्यवृष्यकेश्यकण्ठ्यवर्ण्यविरजनीयरोपणीयानां, वायुः प्राणसंज्ञाप्रदानहेतूनाम्, अग्निरामस्तम्भशीतशूलोद्वेपनप्रशमनानां, जलं स्तम्भनीयानां, मृद्भृष्टलोष्ट्रनिर्वापितमुदकं तृष्णाच्छर्द्यतियोगप्रशमनानाम्, अतिमात्राशनमामप्रदोषहेतूनां, यथाग्न्यभ्यवहारोऽग्निसन्धुक्षणानां, यथासात्म्यं चेष्टाभ्यवहारौ सेव्यानां, कालभोजनमारोग्यकराणां, तृप्तिराहारगुणानां,

मूत्रकृच्छ्र- મૂત્રકૃચ્છ્ર મૂત્રकृच्छ्र, अनिलहराणाम् તથા વાયુને હરનારાંઓમાં तथा वायुको हरनेवालोंमें, गोक्षुरक. ગોખરુ गोक्षुर, छेदनीय- દોષોનું છેદન કરનારાંઓ दोषोंको छेदन करनेवालों, दीपनीय- દીપન કરનારાંઓ दीपन करनेवालों, आनुलोमिक- અનુલોમન કરનારાંઓ अनुलोमन करनेवालों, वात-कफ- તથા વાત તેમજ કફનું वात एवं कफको, प्रशमनानाम् પ્રશમન કરનારાંઓમાં प्रशमन करनेवालोंमें, हिङ्गुनिर्यास હિંગ हींग, भेदनीय- ભેદન કરનારાંઓ भेदन करनेवालों, दीपनीय- દીપન કરનારાંઓ दीपन करनेवालों, आनुलोमिक- અનુલોમન કરનારાંઓ अनुलोमन करनेवालों, वात-श्लेष्म- તથા વાત તેમજ કફને वात एव कफको, हराणाम् હરનારાંઓમાં हरनेवालोंमें, अम्लवेतस- અમ્લવેતસ अम्लवेत, स्रंसनीय- સ્રંસન स्रंसन, पाचनीय- પાચન पाचन, अर्शोघ्नानाम् તથા હરસનો નાશ કરનારાંઓમાં तथा अर्शको नाश करनेवालोंमें, यावशूकः જવખાર यवक्षार, ग्रहणीदोष- ગ્રહણીદોષ ग्रहणीदोष, शोफ- સોજો सूजन, अर्शः- હરસ बवासीर, घृतव्यापत्- તથા ઘૃતવ્યાપત્‌નું तथा घृतव्यापत्को, प्रशमनानाम् શમન કરનારાંઓમાં शमन करनेवालोंमें, तक्राभ्यास તક્રનો અભ્યાસ तक्रका निरन्तर सेवन, ग्रहणीदोष- ગ્રહણીદોષ ग्रहणीदोष, शोष- શોષ शोष, अर्शोघ्नानाम् તથા હરસના નાશકોમાં और अर्शके नाशकोंमें, क्रव्यान्मांसरसाभ्यास ક્રવ્યાદના માંસરસોનો અભ્યાસ क्रव्याद प्राणियोंके मांसरसोंका सेवन, रसायनानाम् રસાયનોમાં रसायनोंमें, क्षीरघृताभ्यास દૂધ અને ઘીનો અભ્યાસ दूध और घीका सेवन, वृष्य- વૃષ્ય वृष्य, उदावर्तहराणाम् અને ઉદાવર્ત હરનારાંઓમાં और उदावर्त हरनेवालोंमें, समघृत- સમાન ઘીની સાથે समान घीके साथ, सक्तुप्राश- સાથવો ખાવાનો सक्तु खानेकी, अभ्यासः અભ્યાસ आदत, दन्तबल- દાંતોનું બળ दन्तोंका बल, रुचिकराणाम् તથા રુચિ કરનારાંઓમાં और रुचि उत्पन्न करनेवालोंमे, तैलगण्डूष- તેલના ગણ્ડૂષનો तैलके गण्डूषोंकी, अभ्यासः અભ્યાસ आदत, दुर्गन्धहर- દુર્ગન્ધનાશક दुर्गन्धनाशक, दाहनिर्वापण- અને દાહશામક और दाहशामक, लेपनानाम् લેપોમાં लेपोंमे, चन्दनम् ચન્દન चन्दन, शीतापनयन- ઠંડી દૂર કરનારાં शीतको दूर करनेवाले, प्रलेपनानाम् પ્રલેપનોમાં प्रलेपनोंमे, रास्नागुरुणी રાસ્ના અને અગર रास्ना और अगुरु, दाह- દાહ दाह, त्वग्दोष- ચામડીના દોષો त्वचाके दोष, स्वेदापनयन- અને પરસેવો દૂર કરનારાં और पसीनेको दूर करनेवाले, प्रलेपनानाम् પ્રલેપનોમાં प्रलेपनोंमें, लामज्जकोशीरम् પીળો વાળો ને વીરણવાળો लामज्जक और खस, वातहर- વાતહર वातहर, अभ्यङ्ग- અભ્યંગ अभ्यङ्ग, उपनाह- તથા ઉપનાહમાં तथा उपनाहके, उपयोगिनाम् ઉપયોગી દ્રવ્યોમાં उपयोगी द्रव्योंमे, कुष्ठम् કઠ कूठ, चक्षुष्य- ચક્ષુષ્ય चक्षुष्य, वृष्य- વૃષ્ય वृष्य, केश्य- કેશ્ય केश्य, कण्ठ्य- કણ્ઠ્ય कण्ठ्य, वर्ण्य- વર્ણ્ય वर्ण्य, विरजनीय- વિરજનીય विरजनीय, रोपणीयानाम् અને રોપણીય દ્રવ્યોમાં और रोपणीय द्रव्योंमें, मधुकम् જેઠીમધ मुलैठी, प्राण-

---

४० ग्रहणीदोषशोफार्शो°—ग्रहणीदोषार्शो° (घ त)
,, चन्दनं दुर्गन्धहर°—चन्दनोदुम्बरे दुर्गन्धहर° (छ)
,, रास्नागुरुणी—कृष्णागुरु (प)
,, वर्ण्य°—वर्ण्यबल्य° (घ छ)
,, अग्निराम°—अग्निरांत° (ढ प)
,, शूलोद्वेपन°—शूलोद्वेष्टन° (ग)
,, मृद्भृष्टलोष्ट्रनिर्वापितमुदक—मृद्भृष्टलोष्ट्रप्रभाव (च)
,, चेष्टाभ्यवहारौ सेव्यानां—चेष्टाभ्यवहारौ उपसेव्यानां (च छ)
,, कालभोजनम्—काले भोजनम् (ग)

પ્રાણ प्राण, संज्ञाप्रदानां- અને સંજ્ઞા દેનારા और संज्ञा देनेवाले, हेतूनाम् હેતુઓમાં हेतुओंमे, वायुः વાયુ वायु, आम- આમ आम, स्तम्भ- જડતા जड़ता, शीत- શીત शीत, शूल- શૂળ शूल, उद्वेपन- તથા કંપના और कम्पको, प्रशमनानाम् પ્રશામકોમાં शमन करनेवालोंमे, अग्नि અગ્નિ अग्नि, स्तम्भनीयानाम् સ્તંભન દ્રવ્યોમાં स्तम्भन द्रव्योंमें, जलम् જળ जल, तृष्णा- તરસપ્યાસ, छर्दि- અને ઉલટીના और वमनका, अतियोग અતિયોગને अतियोगको, प्रशमनानाम् શમન કરનારાંઓમાં शमन करनेवालोंमें, मृद्भृष्टलोष्ट्- તપાવેલા માટીના ઢેફાને तपाये हुए मिट्टीके ढेलेसे, निर्वापितम् उदकम् જે જળમાં ઠાર્યું હોય તે જળ वुझाया गया जल, आमप्रदोष- આમદોષના आमदोषके, हेतूनाम् હેતુઓમાં हेतुओंमें, अतिमात्राशनम् અધિક પ્રમાણમાં ખાવુ अधिक मात्रामें खाना, अग्नि-सन्धुक्षणानाम् અગ્નિ પ્રદીપ્ત કરનારાંઓમાં अग्नि प्रदीप्त करनेवालोंमें, यथाग्नि- અગ્નિ પ્રમાણે अग्नि अनुसार, अभ्यव्यवहार ખાવુ खाना, सेव्यानाम् સેવન યોગ્ય પદાર્થોમાં सेवनयोग्य वस्तुओंमें, यथासात्म्यम् સાત્મ્ય અનુસાર सात्म्य अनुसार, चेष्टाभ्यवहारौ વિહાર આહાર विहार आहार, आरोग्यकराणाम् આરોગ્ય કરનારાંઓમાં आरोग्य करनेवालोंमें, कालभोजनम् સમયસર ભોજન यथाकाल भोजन, आहारगुणानाम् અને આહારના ગુણોમાં और आहारके गुणोंमे, तृप्ति તૃપ્તિ સર્વથી શ્રેષ્ઠ છે तृप्ति सवसे श्रेष्ठ है;

40-(3). the small caltrops among those that are curative of dysuria and vata; the asafetida among those that split up the morbid humors, that are digestive stimulants and correctives of peristalsis and are alleviatives of vata and kapha. The amlavetasa among those that are laxatives, digestive stimulants, correctives of peristalsis and curatives of vata and kapha; the barley-ash among those that are laxatives, digestives and curatives of piles; the habitual use of buttermilk among those that are curative of the assimilation disorder, edema and piles and complications due to wrongful use of ghee; the habitual use of the meat-juice of carnivorous animals among those curative of the assimilation-disorders, consumption and piles; the habitual use of milk and ghee among those that are vitalizers; the habitual use of a diet consisting of equal parts of ghee and roasted corn-flour among those that are seminiferous and curative of misperistalsis; the habitual gargling with til-oil among those that increase the taste and the strength of the teeth; the paste of sandal among applications that remove fetor and are alleviative of burning; the indian groundsel and eagle-wood among applications that dispel the coldness of the body; geranium grass and cus-cus among applications that alleviate burning, skin-affections and sweating; the costus among those that are curative of vata and useful in inunctions and poultices; the liquorice among those that are beneficial for the eyes, virility, the hair, the throat, the complexion, pigmentation and promotive of healing; the air among those that restore animation and consciousness; heat among those that are curative of chyme-disorders, stiffness, chill, colic and shivering; water among astringents; the water in which a heated clod of earth has been

quenched is the foremost among those that are alleviative of excessive thirst and excessive vomiting; over-eating among those that are inducive of chyme-disorders; eating according to one's digestive capacity among those that are stimulative of gastric fire; eating and working in conformity to one's constitution among good practices; timely eating among those that promote health, the giving of satisfaction among the properties of food;

वेगसन्धारणमनारोग्यकराणां, मद्यं सौमनस्यजननानां, मद्याक्षेपो धीधृतिस्मृतिहराणां, गुरुभोजनं दुर्विपाककराणाम्, एकाशनभोजनं सुखपरिणामकराणां, स्त्रीष्वतिप्रसङ्गः शोषकराणां, शुक्रवेगनिग्रहः षाण्ड्यकराणां, पराघातनमन्नाश्रद्धाजननानाम्, अनशनमायुषो ह्रासकराणां, प्रमिताशनं कर्शनीयानाम्, अजीर्णाध्यशनं ग्रहणीदूषणानां, विषमाशनमग्निवैषम्यकराणां, विरुद्धवीर्याशनं निन्दितव्याधिकराणां, प्रशमः पथ्यानां, आयासः सर्वापथ्यानां, मिथ्यायोगो व्याधिकराणां,

अनारोग्यकराणाम् આરોગ્ય બગાડનારાંઓમા આરોગ્યको बिगाडनेवालोंमें, वेगसन्धारणम् વેગોને રોકવા वेगोंको रोकना, सौमनस्यजननानाम् ચિત્ત પ્રસન્ન કરનારાંઓમાં चित्त प्रसन्न करनेवालोंमें, मद्यम् મદ્ય शराब, धी- બુદ્ધિ बुद्धि, धृति- ધૈર્ય धैर्य, स्मृतिहराणाम् અને સ્મૃતિ હરનારાંઓમાં और स्मृति हरनेवालोंमें, मद्याक्षेप- મદ્યજનિત મત્તતા मद्यजनित मत्तता, दुर्विपाक-कराणाम् મુશ્કેલીથી પચનારાંઓમાં कठिनाईसे पचनेवालोंमें, गुरुभोजनम् ભારે ભોજન भारी भोजन, सुखपरिणामकराणाम् સુખથી પચી જનારાંઓમાં सुखसे पचनेवालोंमें, एकाशनभोजनम् એકવાર ભોજન एक समय भोजन, शोषकराणाम् શોષ ઉત્પન્ન કરનારાંઓમાં शोष करनेवालोंमें, स्त्रीषु अतिप्रसङ्ग સ્ત્રીઓ વિષે અતિપ્રસંગ स्त्रियोंमे अतिप्रसंग, षाण्ड्यकराणाम् નપુંસકતા કરનારાંઓમાં नपुंसकता करनेवालोंमे, शुक्रवेगनिग्रह- શુક્રના વેગનો નિગ્રહ शुक्रवेगका रोकना, अन्नाश्रद्धाजननानाम् અન્નમાં અશ્રદ્ધા ઉત્પન્ન કરનારાંઓમાં अन्नमें अश्रद्धा उत्पन्न करनेवालोंमें, पराघातनम् વધસ્થાન वधस्थान, आयुष આયુનો आयुका, ह्रासकराणाम् હ્રાસ કરનારાંઓમાં ह्रास करनेवालोंमें, अनशनम् અભોજન अभोजन, कर्शनीयानाम् કૃશતા ઉત્પન્ન કરનારાંઓમાં कृशता उत्पन्न करनेवालोंमें, प्रमिताशनम् અલ્પ ભોજન अल्प भोजन, ग्रहणीदूषणानाम् ગ્રહણી દૂષિત કરનારાંઓમાં ग्रहणीको दूषित करनेवालोंमें, अजीर्णाध्यशनम् અજીર્ણ ઉપર ભોજન अजीर्ण होनेपर भोजन, अग्निवैषम्यकराणाम् અગ્નિની વિષમતા કરનારાંઓમાં अग्निकी विषमता करनेवालोंमें, विषमाशनम् વિષમ ભોજન विषम भोजन, निन्दितव्याधिकराणाम् નિન્દિત વ્યાધિ કરનારાંઓમાં निन्दित व्याधि करनेवालोंमें, विरुद्धवीर्याशनम् વિરુદ્ધ વીર્યવાળા પદાર્થનું ભોજન विरुद्ध वीर्यवाले पदार्थोंका भोजन, पथ्यानाम् હિતકર પદાર્થોમાં हितकर पदार्थोंमें, प्रशम પરમ શાન્તિ परम शान्ति, सर्वापथ्यानाम् સર્વ અપથ્યોમા सब अपथ्योंमें, आयास- આયાસ बहुत परिश्रम, व्याधिकराणाम् અને વ્યાધિ કરનારાઓમાં व्याधि करनेवालोंमें, मिथ्यायोग મિથ્યાયોગ સર્વથી શ્રેષ્ઠ છે मिथ्यायोग सबसे श्रेष्ठ हैं,

४० दुर्विपाककराणाम्–दुर्विपाकानाम् (ग घ)
,, एकाशनभोजन–एककालभोजन (क.)
,, शोषकराणा–शोषहाराणा (घ.ठ)
,, पराघातन–परायतन (ढ.)
,, अनशनमायुषो ह्रासकराणा–अनशनमनायुष्कराणा (च)
,, अजीर्णाध्यशन–अजीर्णाशन (च)
,, मिथ्यायोगो व्याधिकराणा–मिथ्यायोगो व्याधिमुखाना (ख घ ङ.ख ङ,ठ.)

40-(4) the suppression of natural urges among those that are causative of ill-health, wine among those that cause exhilaration, intemperate indulgence in wine among those that impair understanding, resolution and memory, heavy eating among those

that give rise to mis-digestion; eating one meal in the day among those that conduce to easy digestion and assimilation; excessive indulgence in sex among those that cause comsumption; the constant suppression of seminal ejaculation among those that cause emasculation; the sight of a slaughtering place among those that destroy the inclination for food; abstinence from food among those that tend to curtail life, under-eating among those that tend to reduce a person, predigestion meal among those that induce the assimilation disorders, irregular eating among those that cause irregularity of gastric fire; the eating of foods of antagonistic potency among those that lead to censurable diseases; self-restraint among those that are wholesome; straining oneself among those that are unwholesome; wrong indulgence among those that are generative of diseases;

रजस्वलाभिगमनमलक्ष्मीमुखानां, ब्रह्मचर्यमायुष्याणां, परदाराभिगमनमनायुष्याणां, सङ्कल्पो वृष्याणां, दौर्मनस्यमवृष्याणाम्, अयथाबलमारम्भः प्राणोपरोधिनां, विषादो रोगवर्धनानां, स्नानं श्रमहराणां, हर्षः प्रीणनानां, शोकः शोषणानां, निवृत्तिः पुष्टिकराणां, पुष्टिः स्वप्नकराणाम्, अतिस्वप्नस्तन्द्राकराणां, सर्वरसाभ्यासो बलकराणाम्, एकरसाभ्यासो दौर्बल्यकराणां,

अलक्ष्मीमुखानाम् દારિદ્રના ઉત્પાદકોમાં दारिद्र्यके उत्पादकोंमें, रजस्वलाभिगमनम् રજસ્વલાગમન रजस्वला-गमन, आयुष्याणाम् આયુષ્ય વધારનારાંઓમાં आयु वढानेवालोंमें, ब्रह्मचर्यम् બ્રહ્મચર્ય ब्रह्मचर्य, अनायुष्याणाम् આયુષ્યનો નાશ કરનારાંઓમાં आयुके नाशकोंमें, परदाराभिगमनम् પરસ્ત્રીગમન परस्त्रीगमन, वृष्याणाम् વૃષ્યોમાં वृष्योंमें, सकल्पः સંકલ્પ सकल्प, अवृष्याणाम् અવૃષ્યોમાં अवृष्योंमें, दौर्मनस्यम् મનની ઉદ્વિગ્નતા मनकी उद्विग्नता, प्राणोपरोधिनाम् પ્રાણઘાતકોમાં प्राणनाशकोंमें, अयथाबलम्-आरम्भ ગજા ઉપરાંતનું કાર્ય शक्तिसे ज्यादा कार्यका आरम्भ, रोगवर्धनानाम् રોગ વધારનારાંઓમાં रोग वढानेवालोंमें, विषादः ખિન્નતા खिन्नता, श्रमहराणाम् શ્રમ હરનારાંઓમાં श्रम हरनेवालोंमें, स्नानम् સ્નાન स्नान, प्रीणनानाम् પ્રસન્નતા કરનારાંઓમાં प्रसन्नता करनेवालोंमें, हर्ष· હર્ષ हर्ष, शोषणानाम् શોષણ કરનારાંઓમાં शोषण करनेवालोंमें, शोकः શોક शोक, पुष्टिकराणाम् પુષ્ટિકારકોમાં पुष्टिकारकोंमें, निवृत्ति. નિવૃત્તિ निवृत्ति, स्वप्नकराणाम् નિદ્રા લાવનારાંઓમાં निद्रा करनेवालोंमें, पुष्टि પુષ્ટિ पुष्टि, तन्द्राकराणाम् તન્દ્રા કરનારાંઓમાં तन्द्रा करनेवालोंमें, अतिस्वप्न અતિ નિદ્રા अति निद्रा, बलकराणाम् બળકારકોમાં बलकारकोंमें, सर्वरसाभ्यास સર્વ રસોનો અભ્યાસ सर्वरसोंका सेवन, दौर्बल्यकराणाम् અને દુર્બળતા કરનારાંઓમાં और दुर्बलता करनेवालोंमें, एकरस- એકરસનો एकरसका, अभ्यास. અભ્યાસ સર્વથી શ્રેષ્ઠ છે सेवन सबसे श्रेष्ठ है,

40-(5). co-habitation with a woman in her menses among those that are inauspicious; continence among those that promote longevity; adultery among those that lead to the shortening of life; determination among virilifics, disgust among anti-virilifics; enterprises that are beyond one's capacity among those that are harmful to one's life, grief among those that promote disease; bathing among those that remove fatigue, joy among those that give delight, grief

४०. परदाराभिगमनम्—परदारगमनम् (क)

,, अतिस्वप्न.—स्वप्न (ख, ष. ह.)

among those that cause wasting, inactivity among those that tend to promote corpulence, corpulence among those that induce sleep, excessive sleep among those that give rise to torpor, the habitual use of food containing all the tastes among those that promote strength; the habitual indulgence in only one taste among those that cause weakness;

गर्भशल्यमाहार्याणाम्, अजीर्णमुद्धार्याणां, बालो मृदुभेषजीयानां, वृद्धो याप्यानां, गर्भिणी तीक्ष्णौषधव्यवायव्यायामवर्जनीयानां, सौमनस्यं गर्भधारणानां, सन्निपातो दुश्चिकित्स्यानाम्, आमो विषमचिकित्स्यानां, ज्वरो रोगाणां, कुष्ठं दीर्घरोगाणां, राजयक्ष्मा रोगसमूहानां, प्रमेहोऽनुषङ्गिणां, जलौकसोऽनुशस्त्राणां, बस्तिस्तन्त्राणां,

आहार्याणाम् એથી કાઢવા યોગ્ય વસ્તુઓમાં खीचने योग्य वस्तुओमें, गर्भशल्यम् ગર્ભરૂપ શલ્ય गर्भरूपशल्य, उद्धार्याणाम् દૂર કરવા યોગ્ય વસ્તુઓમાં दूर करने योग्य वस्तुओमे, अजीर्णम् અજીર્ણ अजीर्ण, मृदुभेषजीयानाम् મૃદુ ઔષધને યોગ્ય મનુષ્યોમા मृदु औषधके योग्य मनुष्योंमें, बाल બાળક बालक, याप्यानाम् યાપ્યોમા याप्योंमें, वृद्धः વૃદ્ધ वृद्ध, तीक्ष्णौषध- તીક્ષ્ણ ઔષધ तीक्ष्ण औषध, व्यवाय- મૈથુન मैथुन, व्यायाम- અને કસરત और व्यायाम, वर्जनीयानाम् તજવવા યોગ્યોમાં परित्याग करने योग्योंमें, गर्भिणी ગર્ભિણી સ્ત્રી गर्भवती, गर्भधारणानाम् ગર્ભનું ધારણ કરાવનારા હેતુઓમા गर्भधारक हेतुओंमे, सौमनस्यम् ચિત્તની પ્રસન્નતા चित्तकी प्रसन्नता, दुश्चिकित्स्यानाम् દુશ્ચિકિત્સ્ય રોગોમા दुश्चिकित्स्य रोगोंमे, सन्निपात સન્નિપાત सन्निपात, विषमचिकित्स्यानाम् વિષમ ચિકિત્સ્ય રોગોમાં विषम चिकित्स्य रोगोंमें, आमः આમ आम, रोगाणाम् રોગોમાં रोगोंमें, ज्वर જ્વર ज्वर, दीर्घरोगाणाम् દીર્ઘરોગોમાં दीर्घरोगोंमें कुष्ठम् કુષ્ઠ कुष्ठ रोगसमूहानाम् રોગસમૂહોમાં रोगसमूहोंमें, राजयक्ष्मा રાજ્યક્ષ્મા राजयक्ष्मा, अनुषङ्गिणाम् ફરી ઉત્પન્ન થનારા રોગોમા पुनः हो जानेवाले रोगोंमें, प्रमेह પ્રમેહ प्रमेह, अनुशस्त्राणाम् અનુશસ્ત્રોમાં अनुशस्त्रोंमें, जलौकस જળો जोंक, तन्त्राणाम् અને સાધનોમાં और साधनोंमें, बस्ति. બસ્તિ સર્વથી શ્રેષ્ઠ છે बस्ति सबसे श्रेष्ठ है,

४० गर्भशल्यमाहार्याणाम्—गर्भशल्यमनाहार्याणाम् (ज ठ प)
,, गर्भधारणानां—गर्भधारकाणां (ज)
,, जलौकसोऽनुशस्त्राणां—जलौका शस्त्राणां (ग. प.)
,, तन्त्राणां—साधनानां (प)
,, ,, —यन्त्राणां (प)

40-(6). a dead fetus among those that require to be extracted, a waning digestion among those that require to be stimulated, an infant among those that require mild medicatives; an old man among those who require palliative treatment, a pregnant woman among those that should be spared strong medication, sex-act and exercise; cheerful spirits among those that help to retain conception (in women), the simultaneous provocation of all the three humors among those that are difficult of treatment; the chyme toximia among those that are irremediable; the fever among diseases; dermatosis among chronic diseases; consumption among the syndromes of diseases, anomalies of the urinary secretion among ralapsing diseases, leeches among those that are auxiliaries to surgical instruments; enemata among those requiring practical technique,

हिमवानौषधिभूमीनां, सोम ओषधीनां, मरुभूमिरारोग्यदेशानाम्, अनूपोऽहितदेशानाम्, निर्देशकारित्वमातुरगुणानां, भिषक् चिकित्साङ्गानां, नास्तिको वर्ज्यानां, लौल्यं क्लेशकराणाम्.

४०. नास्तिको वर्ज्यानां—नास्तिकोऽत्याज्यानां (ग. प)

अनिर्देशकारित्वमरिष्टानां, अनिर्वेदो वार्तलक्षणानां, वैद्यसमूहो निःसंशयकराणां, योगो वैद्यगुणानां, विज्ञानमौषधीनां, शास्त्रसहितस्तर्कः साधनानां, संप्रतिपत्तिः कालज्ञानप्रयोजनानाम्, अव्यवसायः कालातिपत्तिहेतूनां, दृष्टकर्मता निःसंशयकराणाम्, असमर्थता भयकराणां, तद्विद्यसंभाषा बुद्धिवर्धनानाम्, आचार्यः शास्त्राधिगमहेतूनाम्, आयुर्वेदोऽमृतानां, सद्वचनमनुष्ठेयानाम्, असद्ग्रहणं सर्वाहितानां, सर्वसंन्यासः सुखानामिति ॥४०॥

औषधिभूमीना ઔષધીઓની ભૂમિઓમાં औषधियोंकी भूमियोंमें, हिमवान् હિમાલય हिमालय, ओषधीनाम् ઔષધિઓમાં ओषधियोंमें, सोम સોમ सोम, आरोग्यदेशानाम् આરોગ્યકર દેશોમાં आरोग्यकर देशोंमें, मरुभूमि મરુભૂમિ मरुभूमि अहितदेशानाम् અહિત દેશોમાં अहित देशोंमें, अनूप અનૂપદેશ अनूपदेश, आतुरगुणानाम् રોગીના ગુણોમાં रोगीके गुणोंमें, निर्देशकारित्वम् આજ્ઞા પ્રમાણે વર્તન आज्ञानुसार वर्तन, चिकित्साङ्गानाम् ચિકિત્સાનાં અંગોમાં चिकित्साके अङ्गोंमें, भिषक् વૈદ્ય वैद्य, वर्ज्यानाम् વર્જ્નીયોમાં वर्जनीयोंमें, नास्तिक નાસ્તિક नास्तिक, क्लेशकराणाम् ક્લેશ કરનારાઓમાં क्लेशकारकोंमें, लौल्यम् લોલુપતા लोलुपता, अरिष्टानाम् અરિષ્ટોમાં अरिष्टोंमें, अनिर्देशकारित्वम् આજ્ઞા પ્રમાણે ન ચાલવું आज्ञा अनुसार न चलना, वार्तलक्षणानाम् ક્ષેમકુશળનાં લક્ષણોમાં क्षेमकुशलके लक्षणोंमें, अनिर्वेद ઉત્સાહ उत्साह, निःसंशयकराणाम् સંશય દૂર કરનારાંઓમાં संशय दूर करनेवालोंमें वैद्यसमूह વૈદ્યોનો સમૂહ वैद्योंका समूह, वैद्यगुणानाम् વૈદ્યના ગુણોમાં वैद्यके गुणोंमें, योग. કર્મમાં કુશળતા कर्ममें कुशलता, औषधीनाम् ઔષધિઓમાં औषधियोंमें, विज्ञानम् વિશેષજ્ઞાન विशेषज्ञान, साधनानाम् સાધનોમાં साधनोंमें, शास्त्रसहित तर्क શાસ્ત્રયુક્ત તર્ક शास्त्रयुक्त तर्क, कालज्ञान- કાળજ્ઞાનના कालज्ञानके प्रयोजनानाम् ફળોમાં फलोंमें, सम्प्रतिपत्ति. યથાકર્તવ્યતાનું અનુષ્ઠાન यथाकर्तव्यताका अनुष्ठान, कालातिपत्तिहेतूनाम् સમય ગુમાવવાના હેતુઓમાં समय गँवानेके हेतुओंमें, अव्यवसाय અનુદ્યોગ अनुद्योग, निःसंशयकराणाम् નિઃસંશય કરાવનારાંઓમાં निःसंशय करानेवालोंमें, दृष्टकर्मता પ્રત્યક્ષકર્મતા प्रत्यक्षकर्मता, भयकराणाम् ભય ઉત્પન્ન કરનારાઓમાં भय पैदा करनेवालोंमें, असमर्थता અસામર્થ્ય असामर्थ्य, बुद्धिवर्धनानाम् બુદ્ધિ વધારનારાંઓમાં बुद्धि बढानेवालोंमें, तद्विद्यसंभाषा તદ્વિદો સાથે ચર્ચા तद्विद्योंके साथमें चर्चा, शास्त्राधिगम- શાસ્ત્રજ્ઞાનના शास्त्रज्ञानके, हेतूनाम् હેતુઓમાં हेतुओंमें, आचार्य આચાર્ય आचार्य, अमृतानाम् અમૃતોમાં अमृतोंमें, आयुर्वेदः આયુર્વેદ आयुर्वेद, अनुष्ठेयानाम् પાલન કરવા યોગ્યમાં पालन करने योग्योंमें, सद्वचनम् સત્પુરુષોનું વચન सद्वचन, सर्वाहितानाम् સર્વ અહિતોમાં सर्व अहितोंमें असद्ग्रहणम् અસત્નું ગ્રહણ असत्का ग्रहण, सुखानाम् અને સુખોમાં और सुखोंमें, सर्वसंन्यासः इति સર્વસંન્યાસ સર્વથી શ્રેષ્ઠ છે सर्वसंन्यास सबसे श्रेष्ठ है ॥ ४० ॥

40 the Himalayas among the habitats of medicinal herbs; soma among herbs; an arid country among sanatoria; a wet country among insalubrious regions; obedience to physician's direction among the virtues of a patient, the physician among the factors of therapeutics; the disbeliever among those who are to be avoided, yielding to temptation among those that cause mortification; the disobedience of the patient among fatal prognostic symptoms, zest for

---

४० वार्त आर्त (झ ङ)
, कालज्ञानप्रयोजनानाम्–फलज्ञानप्रयोजनानाम् (घ)
,, अव्यवसाय कालातिपत्तिहेतूना – अव्यवसाय कालनिष्पत्तिहेतूना (ग)
,, ,, –व्यवसाय फलप्राप्तिहेतूना (ग)
,, , अनुद्योगो व्यवसायकालातिपत्तिहेतूना (झ)
, असद्ग्रहण–असवद्वचनमसग्रहण (घ छ)
,, ,, –असद्वचनमसवद्वचन (घ.)

life among attributes of health; an assemblage of physicians among those that help to resolve doubts; practical skill among the qualities of a physician; applied scientific knowledge in pharmacology; reason supported by scripture among the means of knowledge, a sense of propriety among the results accruing from a knowledge of time; indolence among the causes of procrastination; practical work and observation among those that dispell doubts, incompetence among the causes of fear; clinical discussions among those that help to broaden one's understanding, the teacher among those who help one in the acquisition of learning; the science of life among elixirs; good precepts among those that deserve to be practised, a misunderstanding among those that are injurious; and the renunciation of all things among those that give happiness

तेषा चिकित्सायामुपयोग —

भवन्ति चात्र—

अग्र्याणां शतमुद्दिष्टं यद्द्विपञ्चाशदुत्तरम् ।
अलमेतद्विकाराणां विघातायोपदिश्यते ॥४१॥

अत्र च આ વિષયમાં इस विषयमें, भवन्ति શ્લોકો છે કે श्लोक हैं कि, अग्र्याणाम् શ્રેષ્ઠ ભાવોનુ श्रेष्ठ भावोंका, यत् જે जो द्विपञ्चाशत् બાવન છે बावन है, उत्तरम् અધિક જેમાં એવુ अधिक जिसमे ऐसा, शतम् શત शत, उद्दिष्टम् કહ્યું છે અર્થાત્ એકસો બાવન શ્રેષ્ઠ ભાવો કહ્યા છે कहा है अर्थात् एकसो बावन श्रेष्ठ भावों कहे हैं, एतत् એ ये, विकाराणाम् વિકારોના विकारोके, विघाताय નાશ માટે नाशके लिए, अलम् પૂરતા છે पर्याप्त हैं, उपदिश्यते એમ કહેવામાં આવે છે ऐसा कहा जाता है ॥४१॥

Here are verses again—

41. The foremost of their kind, numbering a hundred and fifty-two which have been enumerated above, are pronounced to be sufficient for curing all disorders.

समानकारिणो येऽर्थास्तेषां श्रेष्ठस्य लक्षणम् ।
ज्यायस्त्वं कार्यकर्तृत्वे वरत्वं चाप्युदाहृतम् ॥४२॥

ये अर्थाः જે ભાવો जो भाव, समानकारिण. તુલ્ય કર્મ કરનારા છે समान कर्म करनेवाले हैं, तेषाम् તેઓ-માંના उनमेसे, श्रेष्ठस्य શ્રેષ્ઠનુ श्रेष्ठका, लक्षणम् લક્ષણ लक्षण कार्यकारित्वे કાર્ય કરવામાં कार्य करनेमें, ज्यायस्त्वम् અધિકપણુ अधिकता, वरत्वमपि च અને શ્રેષ્ઠપણુ પણ और श्रेष्ठता भी, उदाहृतम् કહ્યા છે कह दी है ॥ ४२ ॥

42. With regard to things that produce the same or similar results, the characteristics of the best among drugs having similar action as well as that which is the worst, and the main actions of drugs and the best of drugs productive of those effects have also been illustrated

वातपित्तकफानां च यद्यत् प्रशमने हितम् ।
प्राधान्यतश्च निर्दिष्टं यद्व्याधिहरमुत्तमम् ॥४३॥

वातपित्तकफानाम् વાયુ, પિત્ત ને કફના वायु पित्त और कफके, प्रशमने પ્રશમનમા प्रशमन करनेमें, यत् यत् च જે જે जो जो, हितम् હિતકર છે हितकर है,

४२. येऽर्था –येऽपि (ग. थ)
,, कार्यकर्तृत्वे वरत्वम्–कार्यकारित्वेऽवरत्व (घ थ)
,, कार्यकर्तृत्वे कार्यकारित्वे (क च छ ज)
,, ,, –कार्यकर्तृत्व (प)
४३. कफाना–कफेभ्य (व झ. त थ.)

यत् च અને જે और जो, उत्तमम् શ્રેષ્ઠ श्रेष्ठ, व्याधिहरम् વ્યાધિહર છે रोगहर है, प्राधान्यतः તે પ્રધાનપણે वह प्रधानतासे, निर्दिष्टम् બતાવ્યું છે दिखलाया है ॥४३॥

43. Whatever is most efficacious in allaying the discordance of vata, pitta and kapha has been laid down; likewise, whatever is best as a remedy in disease-conditions has also been laid down in the main.

एतन्निशम्य निपुणं चिकित्सां संप्रयोजयेत् ।
एवं कुर्वन् सदा वैद्यो धर्मकामौ समश्नुते ॥४४॥

एतत् આ यह, निपुणम् કુશળતાથી सावधानीसे, निशम्य સાંભળીને सुनकर, चिकित्साम् ચિકિત્સાનો चिकित्साका, संप्रयोजयेत् પ્રયોગ કરવો જોઈએ प्रयोग करना चाहिए, एवम् એ પ્રમાણે इस प्रकार, कुर्वन् કરનાર करनेवाला, वैद्य વૈદ્ય वैद्य, सदा હમેશાં सदा, धर्मकामौ ધર્મ અને કામને धर्म और कामको, समश्नुते પ્રાપ્ત કરે છે प्राप्त करता है ॥ ४४ ॥

44 Having paid heed to these instructions, the skilful man should prescribe treatment. Acting thus, the physician enjoys constantly both the merits of virtue as well as worldly desires.

पथ्यापथ्ययोर्लक्षणम्—

पथ्यं पथोऽनपेतं यद्यच्चोक्तं मनसः प्रियम् ।
यच्चाप्रियमपथ्यं च नियतं तन्न लक्षयेत् ॥४५॥

यत् જે जो, पथ શરીરરૂપ માર્ગનો शरीररूप मार्गका, अनपेतम् અપકાર નથી કરતુ अपकार नहीं करता, यत् च અને જે और जो, मनस મનને मनको, प्रियम् પ્રિય છે प्रिय है, पथ्यम् તે પથ્ય છે वह पथ्य है, यत् च તેમજ જે एव जो, अपथ्यम् શરીરરૂપ માર્ગનો અપકાર કરે છે शरीररूप मार्गका अपकार करता है, अप्रियम् च અને મનને અપ્રિય છે और मनको अप्रिय है, उक्तम् તેને અપથ્ય કહ્યુ છે उसको अपथ्य कहा है, तत् તે બાબતને उसको, नियतम् નિશ્ચિતપણે निश्चितरूपसे न लक्षयेत् નહિ જાણવી જોઈએ नहीं समझना चाहिए ॥४५॥

45. That is the wholesome regimen which does not impair the body system and which is pleasing to the mind. That which is not pleasing is the unwholesome regimen. This should not be regarded as an invariable rule.

द्रव्याणां मात्रादिज्ञानस्य प्रयोजनम्—

मात्राकालक्रियाभूमिदेहदोषगुणान्तरम् ।
प्राप्य तत्तद्धि दृश्यन्ते ते ते भावास्तथा तथा ॥४६॥

हि કારણ કે क्योंकि, तत तत् તે તે उस उस, मात्रा- માત્રા मात्रा, काल- કાળ काल, क्रिया- ક્રિયા क्रिया, भूमि- ભૂમિ भूमि, देह- દેહ देह, दोष- દોષ दोष, गुणान्तरम् અને ગુણભેદોને और गुणभेदोंको, प्राप्य પામીને पा कर, ते ते તે તે वे वे भावाः ભાવો भाव, तथा तथा તેવા તેવા અર્થાત્ પથ્ય કે અપથ્ય અને પ્રિય કે અપ્રિય वैसे वैसे अर्थात् पथ्य अथवा अपथ्य और प्रिय अथवा अप्रिय, दृश्यन्ते દેખવામાં આવે છે देखे जाते हैं ॥ ४६ ॥

46. This or that factor, by reason of variation in effects due to measure, time, mode of preparation, habitat of the drug, bodily constitution, and morbid humor, shows itself, either as wholesome or unwholesome condition.

तस्मात् स्वभावो निर्दिष्टस्तथा मात्रादिराश्रयः ।
तदपेक्ष्योभयं कर्म प्रयोज्यं सिद्धिमिच्छता ॥४७॥

तस्मात् તેથી इसलिए, स्वभावः સ્વભાવ स्वभाव, तथा તથા तथा, मात्रादि માત્રા આદિ मात्रा आदि, आश्रयः આશ્રય आश्रय, निर्दिष्ट બતાવ્યા છે बतलाये

४४ निपुणम्–निपुणः (च. छ)

४५. लक्षयेत्–लक्ष्यते (क. ग च. छ. थ.)

४७. प्रयोज्य सिद्धिम्–योज्य ससिद्धिम् (गं. थं.)

है, सिद्धिम् સિદ્ધિને सिद्धिको, इच्छता ઇચ્છનાર વૈદ્યે चाहनेवाले वैद्यको, तत् તે उन, उभयम् બન્નેને दोनोंका, अपेक्ष्य વિચાર કરી विचार करके, कर्म કર્મનો कर्मका, प्रयोज्यम् પ્રયોગ કરવો જોઈએ प्रयोग करना चाहिए ॥ ४७ ॥

47. Hence it is that we have described the innate nature of substances and their dependence (for their wholesome effect etc.) on measure and the rest. Accordingly one who desires success should devise treatment with due consideration of both these factors

धान्यादयो नव आसवयोनयः—

तदात्रेयस्य भगवतो वचनमनुनिशम्य पुनरपि भगवन्तमात्रेयमग्निवेश उवाच—यथोद्देशमभिनिर्दिष्टः केवलोऽयमर्थो भगवता श्रुतश्चास्माभिः ।

भगवतः ભગવાન भगवान, आत्रेयस्य આત્રેયનું आत्रेयके, तत् તે उस, वचनम् વચન वचनको, अनुनिशम्य સાંભળી सुनकर, पुन अपि ફરીને પણ फिर भी, अग्निवेश અગ્નિવેશે अग्निवेशने, भगवन्तम् ભગવાન भगवान, आत्रेयम् આત્રેયને आत्रेयसे, उवाच કહ્યું कहा, भगवता આપે आपने, अयम् આ यह, केवलः બધો सारा, अर्थः વિષય विषय, यथोद्देशम् ઉદ્દેશ અનુસાર उद्देशके अनुसार, अभिनिर्दिष्ट કહી દેખાડયો છે कह दिया है, अस्माभि અને અમે और हम लोगोंने, श्रुत च સાંભળ્યો છે सुना है,

48-(1). Having listened to this statement of the worshipful Atreya, Agnivesa asked the worshipful teacher once again. "This subject has been dealt with exhaustively as purposed, by your worship, and we too, have followed it (diligently).

आसवद्रव्याणामिदानीमनपवादं लक्षणमनतिसंक्षेपेणोपदिश्यमानं शुश्रूषामह इति ॥ ४८ ॥

४८ अनुनिशम्य–निशम्य (च.)

इदानीम् હવે अब, आसवद्रव्याणाम् આસવ દ્રવ્યોનું आसवद्रव्योंका, अनतिसंक्षेपेण બહુ સંક્ષેપ વગર बहुत सक्षेपसे रहित, उपदिश्यमानम् કહેવામાં આવતા कहे जाते, अनपवादम् અપવાદ વગરના अपवाद रहित, लक्षणम् લક્ષણને लक्षणको, शुश्रूषामहे इति સાંભળવા ઇચ્છીએ છીએ सुनना चाहते हैं ॥ ४८ ॥

48. Now we desire to listen to an unexceptionable description of sprituous beverages given (by your reverence) in not too brief a manner."

तमुवाच भगवानात्रेयः—धान्यफलमूलसारपुष्पकाण्डपत्रत्वचो भवन्त्यासवयोनयोऽग्निवेश ! संग्रहेणाष्टौ शर्करानवमीकाः ।

तम् તેને उससे, भगवान् ભગવાન भगवान, आत्रेयः આત્રેયે आत्रेयने, उवाच કહ્યું कहा, अग्निवेश અગ્નિવેશ ! हे अग्निवेश !, धान्य- ધાન્ય धान्य, फल- ફળ फल, मूल- મૂળ मूल, सार- સાર सार, पुष्प- પુષ્પ पुष्प, काण्ड- કાંડ काण्ड, पत्र- પત્ર पत्र, त्वचः છાલ छाल, शर्करानवमीका અને નવમી સાકર સાથે नवमी शर्करा सहित, संग्रहेण સંક્ષેપમાં सक्षेपमें, अष्टौ આઠ आठ, आसवयोनय આસવને ઉત્પન્ન કરનારાં દ્રવ્યો आसवके कारण द्रव्य, भवन्ति છે हैं;

49-(1). To him replied the worshipful Atreya—"O! Agnivesa, eight in brief are the sources of sprituous liquors viz., grains, fruits, roots, pith, flowers, stalks, leaves and barks and the ninth is sugar.

पथ्यतमानामासवाना चतुरशीतिनिर्देश.—

तास्वेव द्रव्यसंयोगकरणतोऽपरिसंख्येयासु यथापथ्यतमानामासवानां चतुरशीतिं निबोध ।

४९ शर्करानवमीका – शर्करा नवमी (क.ख ग)
,, ,, – शर्करानवम्य (घ)
,, पथ्यतमानामासवानाम्–पथ्यतमासवानाम् (ज.)

द्रव्य- દ્રવ્યોના द्रव्योंके, संयोग- સંયોગ संयोग, करणत અને સંસ્કારથી और संस्कारसे, अपरिसंख्येयासु અસંખ્ય થતી असंख्य बनती हुई, तासु एव તેઓમાંજ उन्हीमें, यथापथ्यतमानाम् મુખ્ય મુખ્ય પથ્યતમ मुख्य मुख्य पथ्यतम, आसवानाम् આસવોની आसवोकी, चतुरशीतिम् ચોરાસીની સંખ્યાને चोरासीकी सख्याको, निबोध જાણો जान लो,

49-(2). Now listen to the enumeration of the 84 varieties of Asavas which are considered the most wholesome out of the innumerable varieties resulting from different combinations of the above-mentioned ingredients.

तद्यथा—सुरासौवीरतुषोदकमैरेयमेदकधान्याम्लाः षड् धान्यासवा भवन्ति,

तद् यथा જેવાકે जैसे कि, सुरा સુરા सुरा, सौवीर- સૌવીર सौवीर, तुषोदक- તુષોદક तुषोदक, मैरेय- મૈરેય मैरेय, मेदक- મેદક मेदक, धान्याम्ला અને ધાન્યામ્લ और धान्याम्ल, षट् એ ૭ ये छ., धान्यासवाः ધાન્યાસવ धान्यासव, भवन्ति છે हैं;

49-(3). Sura, Sauveera, Tushodaka, Maireya, Medaka, and Dhanyamla are made from corn

मृद्वीकाखर्जूरकाश्मर्यधन्वनराजादनतृणशून्यपरूषकाभयामलकमृगलिण्डिकाजाम्बवकपित्थकुवलबदरकर्कन्धुपीलुप्रियालपनसन्यग्रोधाश्वत्थप्लक्षकपीतनोदुम्बराजमोदश‍ृङ्गाटकशङ्खिनीफलासवाः षड्विंशतिर्भवन्ति,

मृद्वीका- દ્રાક્ષ द्राक्ष, खर्जूर- ખજૂર खर्जूर, काश्मर्य- શીવણનાં ફળ गम्भारीके फल, धन्वन- ધામણ धन्वन, राजादन રાયણ खीरनी, तृणशून्य- કેતકી केतकी, परूषक- ફાલસા फालसा, अभया- હરડે हरड, आमलक- આમળાં आवला, मृगलिण्डिका- કરપટાં घोगर, जाम्बव- જાંબુ जामून, कपित्थ- કોઠ कैथ, कुवल- મોટાં બોર बडे बेर, बदर- બોર बेर, कर्कन्धु- ચણીબોર झडबेर, पीलु- પીલુ पीलु, प्रियाल- ચારોળી चिरोंजी, पनस- ફણસ कटहल, न्यग्रोध- વડ वरगद, अश्वत्थ- પીપળો पीपल, प्लक्ष- પીપળ पिलखन, कपीतन- પારસપીપળો पारसपीपल, उदुम्बर- ઉમરો गूलर, अजमोद- અજમોદ अजमोद, शृङ्गाटक શીંગોડાં सिंघाडे, शङ्खिनी- આંખફૂટામણી शंखिनी, फलासवा એ ફળોના આસવો इन फलोंके आसव, षड्विंशति છવ્વીસ छब्बीस, भवन्ति થાય છે होते हैं;

49-(4). Grapes, date, fruits of white teak, common Indian linder, Indian ape flower, screw pine, sweet falsah, chebulic myrobalan, emblic myrobalan, goose berry, jambul, wood apple, jujube, small jujube, wild jujube, tooth brush tree, buchanan's mango, Indian jack, banyan, holy fig, yellow-barked fig, flowering peepul, gular fig, celery seeds, Indian water-chestnut, and ctenolepis—these are the six and twenty fruits from which fruit-wines are manufactured.

विदारिगन्धाश्वगन्धाकृष्णगन्धाशतावरीश्यामात्रिवृद्दन्तीद्रवन्तीबिल्वोरुबूकचित्रकमूलैरेकादश मूलासवा भवन्ति,

विदारिगन्धा- શાલવણ शालपर्णी अश्वगन्धा- આસન असगन्ध, कृष्णगन्धा- સરગવાનાં બીજ सहिजनके बीज, शतावरी- શતાવરી शतावरी, श्यामा કાળુ નસોતર काली निशोथ, त्रिवृत्- નસોતર निशोथ, दन्ती- દન્તી दन्ती, द्रवन्ती- રતનજોત मुगलई एरण्ड, बिल्व- બીલી बेलगिरी, उरुबूक- એરંડો एरण्ड, चित्रकमूलैः અને ચિત્રક એઓનાં મૂળોથી और चित्रक इनके मूलोंसे, एकादश અગિયાર ग्यारह, मूलासवा મૂલાસવો मूलासव, भवन्ति થાય છે होते हैं,

४९ सौवीर–सौवीरक (च)
,, धान्याम्ला –धान्याम्बुष्टा (ख घ ठ)
,, आमलक–आमलकबिभीनक (ग)
,, जाम्बव–जम्बीर (द. प.)

49-(5). Ticktrefoil, winter cherry, drumstick, climbing asparagus, black turpeth, red physic-nut, physic-nut, bael, red-flowered castor-oil plant and white-flowered leadwort are the eleven plants from whose roots, root-wines are manufactured.

शालप्रियकाश्वकर्णचन्दनस्यन्दनखदिरकदर - सप्तपर्णार्जुनासनारिमेदतिन्दुककिणिहीशमीशुक्ति - शिंशपाशिरीषवञ्जलधन्वनमधूकैः सारासवा विंशति र्भवन्ति,

शाल- શાલ साक, प्रियक- અસન खरक, अश्वकर्ण- અશ્વકર્ણ साल, चन्दन- ચન્દન चन्दन, स्यन्दन- તણછ तिनिश, खदिर- ખેર खैर, कदर- સફેદ ખેર सफेद खेर, सप्तपर्ण- સાતવન सतवन, अर्जुन અર્જુન अर्जुन, असन- બીઓ विजयसार, अरिमेद- હરમો બાવળ रेवा, तिन्दुक- ટીંબરવો तेंदू, किणिही- કિણિહી सफेद शिरीष, शमी- ખીજડી शमी, शुक्ति- બોર बेर, शिंशपा- સીસમ शीशम, शिरीष- સરસડો शिरीष, वञ्जल- વાળુંજ वञ्जल, धन्वन- ધામણ धावन, मधूकैः અને મહુડાથી और महुडेसे, विंशति વીસ बीस, सारासवा સારાસવ सारासव, भवन्ति થાય છે होते हैं,

49 (6). Sal, piiyaka, small sal, sandalwood, oojein black wood, catechu, gum arabic tree, dita bark, arjun, spinous kino, white babool, false mangosteen, white sirisha, thamee, small jujube, sisoo sirisha, country-willow, common Indian lindem, mohwah—these are trees from whose pith, pith-wines are manufactured.

पद्मोत्पलनलिनकुमुदसौगन्धिकपुण्डरीकशतपत्रमधूकप्रियङ्गुधातकीपुष्पैर्दश पुष्पासवा भवन्ति,

पद्म- પદ્મ पद्म, उत्पल- નીલ કમળ नीलोफर, नलिन- નલિન नलिन, कुमुद- કુમુદ कुमुद, सौगन्धिक- સૌગન્ધિક सौगन्धिक, पुण्डरीक- પુંડરીક पुण्डरीक, शतपत्र- શતપત્ર शतपत्र, मधूक મહુડા महुवेके फूल, प्रियङ्गु- ઘઉંલા फूलप्रियगु, धातकीपुष्पै અને ધાવડીનાં ફૂલોથી और धायके पुष्पोसे, दश દશ दस, पुष्पासवा. પુષ્પાસવો पुष्पासव, भवन्ति થાય છે होते हैं,

49-(7) Red lotus, blue water-lily, indigo lotus, night-flowering lotus, fragrant white lotus, white lotus, centipetal lotus, mohwah, perfumed cherry, and fulsee flowers—these are the ten flowers from which flower-wines are manufactured.

इक्षुकाण्डेक्षिवक्षुवालिकापुण्ड्रकचतुर्थाः काण्डासवा भवन्ति,

इक्षु- શેરડી बडी ईख, काण्डेक्षु- કાણ્ડેક્ષુ ऊख, इक्षुवालिका- ઇક્ષુવાલિકા इक्षुवालिका, पुण्ड्रकचतुर्था· तथा ચોથી ધોળી શેરડી और चोथा पौडा, काण्डासवा એઓના કાંડોથી—સાંઠાઓથી ચાર કાંડાસવો इनके काण्डोंसे चार काण्डासव, भवन्ति થાય છે होते हैं,

49-(8) Sugar-cane, big sugar-cane ikshu-valika and white sugar-cane are the four plants from whose stems, stem-wines are manufactured.

पटोलताडकपत्रासवौ द्वौ भवतः,

पटोल- પરવળ परवल, ताडक- તથા તાડ એઓનાં પાનથી और ताड इनके पत्रोंस, द्वौ બે दो, पत्रासवौ પત્રાસવ पत्रासव, भवत થાય છે होते हैं,

49-(9). Wild snake gourd and palmyra palm are the two plants from whose leaves leaf-wines are manufactured.

४९ मधूकैः सारासवा—मधूकराजादनसारासवा (प)
,, ,, —मधूकसारासवा (ध च)

४९ पटोलताडक—पटोलताडकौ (ध.)
,, ,, —पटोलनमाल (प.)

तिल्वकलोध्रैलवालुकक्रमुकचतुर्थास्त्वगासवा भवन्ति, शर्करासव एक एवेति ।

तिल्वक- तिल्वक तिल्वक, लोध्र લોધર लोध्र, एलवालुक એલુવા आलुवालु, क्रमुकचतुर्था અને ચોથો પઠાણી લોધર और चौथा पठानी लोध, त्वगासवा એઓની છાલથી इनकी छालसे, त्वगासवाः ચાર ત્વગાસવ चार त्वगासव, भवन्ति થાય છે होते हैं, शर्करासवः શર્કરાસવ शर्करासव, एक. एव इति એક જ છે एक ही है,

49 (10). Tilvaka, lodh, cherry, and pathani lodh are the four plants from whose barks, bark-wines are manufactured. Sugar is the only thing from which sugar-wine is manufactured.

एवमेषामासवानां चतुरशीतिः परस्परेणासंसृष्टानामासवद्रव्याणामुपनिर्दिष्टा भवति ।

एवम् આ પ્રમાણે इस प्रकार, परस्परेण પરસ્પર परस्पर, असंसृष्टानाम् ન મળેલા न मिले हुए, आसवद्रव्याणाम् આસવદ્રવ્યોના आसव द्रव्योंके, एषाम् આ इन, आसवानाम् આસવોની आसवोंकी, चतुरशीति. ચોરાસીની સંખ્યા चोरासीकी सख्या, उपनिर्दिष्टा भवति इति કહી છે कही है,

49-(11). The eighty-four varieties here mentioned are all produced severally from the different fermentable ingredients unmixed with each other.

आसवाना बहुविधो विकल्प संस्कारश्च, आसवशब्दस्य निरुक्ति —

एषामासवानामासुतत्वादासवसंज्ञा । द्रव्यसंयोगविभागविस्तारस्त्वेषां बहुविधकल्पः संस्कारश्च ।

आसुतत्वात् આસુત થયેલા હોવાથી आसुत होनेके कारण, एषाम् આ इन, आसवानाम् આસવોની आसवोंकी, आसवसंज्ञा આસવસંજ્ઞા છે आसवसंज्ञा है, एषाम् એમના इनके, द्रव्यसंयोग- દ્રવ્યોના સંયોગો द्रव्यके सयोग, विभागविस्तार. તથા વિભાગનો વિસ્તાર तथा विभागका विस्तार, संस्कारश्च અને સંસ્કાર और सस्कार, बहुविधकल्प ઘણા પ્રકારવાળા છે बहुत प्रकारके हैं,

49-(12) All these fermented wines are so called because they are obtained by fermentation. Unlimited are the combinations and permutations of which these ingredients are capable and likewise they admit of diverse methods of preparation.

यथास्व संयोगसंस्कारसंस्कृतानामासवानां स्वकर्मकरत्वम्—

यथास्वं संयोगसंस्कारसंस्कृता ह्यासवाः स्वं कर्म कुर्वन्ति । संयोगसंस्कारदेशकालमात्रादयश्च भावास्तेषां तेषामासवानां ते ते समुपदिश्यन्ते तत्तत्कार्यमभिसमीक्ष्येति ॥ ४९ ॥

यथास्वम् પોતપોતાના अपने अपने, संयोग- સંયોગ सयोग, संस्कार- અને સંસ્કારો વડે और संस्कारोंसे, संस्कृता સંસ્કૃત થયેલા सस्कृत हुए, आसवा આસવો आसव, स्वम् પોતાનુ अपना, कर्म કાર્ય कार्य, कुर्वन्ति કરે છે करते है, तत् तत् તે તે उस उस, कार्यम् કાર્યને कार्यको, अभिसमीक्ष्य જોઈ વિચારી लक्ष्य करके, तेषाम् तेषाम् તે તે उन उन, आसवानाम् આસવોના आसवोंके, ते ते તે તે वे वे, संयोग- સંયોગ सयोग, संस्कार- સંસ્કાર संस्कार, देश- દેશ देश, काल- કાળ काल, मात्रादय. च અને માત્રા આદિ और मात्रा आदि, भावा. ભાવો भाव, समुपदिश्यन्ते इति કહેવામાં આવે છે कहे जाते हैं ॥ ४९ ॥

49. Agreeably to their nature and by virtue of the modification resulting from combination and preparation,

४९. उपनिर्दिष्टा—उपदिष्टा
,, विभागविस्तार·—विभागः (घ.)
,, बहुविधविकल्प —बहुविधविकल्पा· (ग ङ)

४९ यथास्व—यथास्वयोनि (घ)
,, स्व कर्म—स्व स्व कर्म (छ)
,, ,, —स्वकर्म (घ ङ)
,, देशकाल—देशकालस्थापना (ख घ)

the wines manifest specific properties; and combination, preparation, time place, and mode of preservation, dose etc., are prescribed in relation to particular wines in view of particular desired results.

आसवाना साधारणगुणाः —

भवति चात्र—

मनःशरीराग्निबलप्रदाना-
मस्वप्नशोकारुचिनाशनानाम् ।
संहर्षणानां प्रवरासवाना-
मशीतिरुक्ता चतुरुत्तरैषा ॥ ५० ॥

अत्र च આ વિષયમાં इस विषयमें, भवति શ્લોક છે કે श्लोक है कि, मन- મન मन, शरीर- શરીર शरीर, अग्नि- અને અગ્નિના और अग्निके, बलप्रदानाम् બળ દેનારા बलको देनेवाले, अस्वप्न- અનિદ્રા अनिद्रा, शोक- શોક शोक, अरुचि- તથા અરુચિનો तथा अरुचिको, नाशनानाम् નાશ કરનારા नष्ट करनेवाले, संहर्षणानाम् અને મનને પ્રફુલ્લ કરનારા और मनको प्रफुल्ल करनेवाले, प्रवर- ઉત્તમ उत्तम, आसवानाम् આસવોની आसवोंकी, एषा આ यह, चतुरुत्तरा ચાર છે અધિક જેમાં એવી चार हैं अधिक जिसमें ऐसी, अशीति- એ સીની સ ખ્યા अस्सीकी सख्या, उक्ता કહી છે कही है ॥ ५० ॥

Here is a verse again—

50. Thus have been enumerated the 84 kinds of the best wines, which promote strength of mind, body and digestive fire, dispel insomnia, depression and anorexia and induce exhilaration.

अध्यायार्थसंग्रह —

तत्र श्लोकः—

शरीररोगप्रकृतौ मतानि
तत्त्वेन चाहारविनिश्चयं च ।

उवाच यज्ञःपुरुषादिकेऽस्मिन्
मुनिस्तथाऽग्र्याणि वरासवांश्च ॥ ५१ ॥

तत्र તે વિષયમાં उस विषयमें, श्लोकः ઉપસંહારનો શ્લોક છે કે उपसंहारका श्लोक है कि, मुनिः મુનિ આત્રેયે मुनि आत्रेयने, अस्मिन् આ इस, यज्ञःपुरुषादिके યજ્જઃપુરુષીય અધ્યાયમાં यज्ञ.पुरुषीय अध्यायमें, शरीर- શરીર शरीर, रोग- અને રોગના और रोगके, प्रकृतौ કારણોમાં कारणोंमें, मतानि ઋષિઓના મત ऋषियोंके मत, तत्त्वेन તત્ત્વપૂર્વક तत्त्वपूर्वक, आहारविनिश्चयम् च આહારનો નિર્ણય आहारका निर्णय, तथा अग्र्याणि શ્રેષ્ઠ દ્રવ્યો श्रेष्ठ द्रव्य, वरासवान् च અને ઉત્તમ આસવો और उत्तम आसव, उवाच કહ્યાં છે कहे हैं ॥ ५१ ॥

Here is the recapitulatory verse—

51. In this chapter entitled "The origin of man", the sage has described the source of body and disease, and the different schools of thought thereon, the rules concerning diet and lastly the most excellent among the wines.

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते श्लोकस्थाने यज्जःपुरुषीयो नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

इति આ પ્રમાણે इस प्रकार, अग्निवेशकृते અગ્નિવેશે રચેલા अग्निवेशसे वनाये, चरकप्रतिसंस्कृते तन्त्रे અને ચરકથી પ્રતિસંસ્કાર પામેલા આ શાસ્ત્રમાં और चरकके द्वारा संस्कृत इस शास्त्रके, श्लोकस्थाने સૂત્રસ્થાન વિષે सूत्रस्थानमें, यज्ञ पुरुषीय 'યજ્જ પુરુષીય' 'यज्ज.पुरुषीय', नाम નામનો नामका, पञ्चविंश પચીસમો पचीसवाँ, अध्याय અધ્યાય સંપૂર્ણ થયો अध्याय समाप्त हुआ ॥ २५ ॥

25. Thus in the section on General Principles in the treatise compiled by Agnivesa and revised by Caraka, the twenty-fifth chapter entitled "The origin of man" is completed.

५१. विनिश्चय च–विनिश्चयो च (ज.ध.)

षड्विंशोऽध्यायः ।

છવ્વીસમો અધ્યાય अध्याय छब्बीसवाँ

Chapter XXVI

आत्रेयभद्रकाप्यीयाध्यायोपक्रमः —

अथात आत्रेयभद्रकाप्यीयमध्यायं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः ॥ २ ॥

अथ अतः હવે અહીંથી अब आगे, '**आत्रेयभद्रकाप्यीयम्**' 'આત્રેયભદ્રકાપ્યીય' નામના 'आत्रेयभद्रकाप्यीय' नामके, **अध्यायम्** અધ્યાયનું अध्यायका, **व्याख्यास्यामः** વ્યાખ્યાન કરશું व्याख्यान करेंगे ॥ १ ॥

भगवान् ભગવાન भगवान, **आत्रेय** આત્રેયે आत्रेयने, **इति ह** આ વિષયમાં નીચે પ્રમાણે જ इस विषयमें निम्न प्रकारसे ही, **आह स्म** કહેલું છે कहा है ॥२॥

1. We shall now expound the chapter entitled "The discussion between Atreya and Bhadrakapya and others."

2. Thus declared the worshipful Atreya.

महर्षीणा समितौ रसाहारविनिश्चये कथा—

आत्रेयो भद्रकाप्यश्च शाकुन्तेयस्तथैव च ।
पूर्णाक्षश्चैव मौद्गल्यो हिरण्याक्षश्च कौशिकः ॥ ३ ॥
यः कुमारशिरा नाम भरद्वाजः स चानघः ।
श्रीमान् वार्योविदश्चैव राजा मतिमतां वरः ॥४॥
निमिश्च राजा वैदेहो बडिशश्च महामतिः ।
काङ्कायनश्च बाह्लीको बाह्लीकभिषजां वरः ॥५॥
एते श्रुतवयोवृद्धा जितात्मानो महर्षयः ।
वने चैत्ररथे रम्ये समीयुर्विजिहीर्षवः ॥ ६ ॥

आत्रेयः આત્રેય आत्रेय, **भद्रकाप्य. च** ભદ્રકાપ્ય भद्रकाप्य, **तथा एव** તેમજ और, **शाकुन्तेय च** શાકુન્તેય शाकुन्तेय, **मौद्गल्यः** મૌદ્ગલ્ય मौद्गल्य, **पूर्णाक्ष च एव** પૂર્ણાક્ષ पूर्णाक्ष, **कौशिकः** કૌશિક ગોત્રનો कौशिक, **हिरण्याक्षः च** હિરણ્યાક્ષ हिरण्याक्ष, **यः** જે जो, **कुमारशिराः** કુમારશિરા कुमारशिरा, **नाम** નામના नामका, **अनघः** પાપરહિત पापरहित, **भरद्वाजः** ભરદ્વાજ भरद्वाज, **सः च** તે वह, **मतिमताम्** બુધ્ધિમાન પુરુષોમાં बुद्धिमानोंमें, **वर.** શ્રેષ્ઠ श्रेष्ठ, **श्रीमान्** શ્રીમાન श्रीमान, **राजा** રાજા राजा, **वार्योविद· च एव** વાર્યોવિદ वार्योविद, **वैदेह** વિદેહનો विदेहका, **राजा** રાજા राजा, **निमिः च** નિમિ निमि, **महामति.** મહામતિ महामति, **बडिशः च** બડિશ बडिश, **बाह्लीकभिषजाम्** બાહ્‌લીક વૈદ્યોમાં बाह्लीक वैद्योमें, **वरः** શ્રેષ્ઠ श्रेष्ठ, **बाह्लीकः** બાહ્‌લીક દેશના बाह्लीक देशका, **काङ्कायन च** કાંકાયન काङ्कायन, **एते** એ जो, **श्रुत-वयो-वृद्धा.** જ્ઞાનવૃદ્ધ અને વયોવૃદ્ધ विद्यावृद्ध और वयोवृद्ध, **जितात्मानः** જિતેન્દ્રિય जितेन्द्रिय, **विजिहीर्षव.** અને વિહાર કરવાની ઇચ્છાવાળા और विहार करनेकी इच्छावाले, **महर्षयः** મહર્ષિઓ महर्षि, **रम्ये** રમણીય रम्य, **चैत्ररथे** ચૈત્રરથ चैत्ररथ, **वने** વનમાં वनमें, **समीयु.** એકઠા થયા एकत्रित हुए ॥३–६॥

3-6. Atreya, Bhadrakapya, Sakunteya, Maudgalya, Purnaksha and Kausika Hiranyaksha, the sinless Bharadwaja known as Kumarasira, the auspicious Varyovida—king and best among men of intelligence, king Nimi of Videha, and Badisa the highly enlightened, Kankayana of the Bahlika country and foremost of the Bahlika physicians—all these, who were advanced in learning and age, disciplined souls and sages, while on a ramble, met in the pleasant wood called Chaitraratha.

तेषां तत्रोपविष्टानामियमर्थवती कथा ।
बभूवार्थविदां सम्यग्रसाहारविनिश्चये ॥ ७ ॥

तत्र ત્યાં वहा, **उपविष्टानाम्** બેઠેલા बैठे हुए, **अर्थविदाम्** અર્થ જાણનાર अर्थवेत्ता, **तेषाम्** તેઓની उनकी, **सम्यक** યથાર્થ यथार्थ, **रस-** રસદ્વારા रसद्वारा, **आहार-**

३ शाकुन्तेय°—शाकुनेय° (ग)

५. महामति·—महामुनि (ग च. य.)

આહારના आहारके, विनिश्चये નિશ્ચયની બાબતમાં निश्चयके लिए, इयम् આ यह, अर्थवती અર્થપૂર્ણ अर्थवती, कथा વાત कथा, बभूव થઈ हुई ॥ ७॥

7. The following significant discussion took place among these connoisseurs who were seated together there.

एक एव रस इत्युवाच भद्रकाप्यः, यं पञ्चानामिन्द्रियार्थानामन्यतमं जिह्वावैषयिकं भावमाचक्षते कुशलाः, स पुनरुदकादनन्य इति ।

भद्रकाप्य ભદ્રકાપ્યે भद्रकाप्यने, उवाच કહ્યું कहा, रस રસ रस, एक એક एक, एव इति એમ જ છે ऐसा ही है, यम् જેને जिसे, कुशला કુશળ મનુષ્યો पण्डित लोग, पञ्चानाम् પાંચ पाच, इन्द्रियार्थानाम् ઇન્દ્રિયોના વિષયમાંનો इन्द्रियोंके विषयोंमेंसे, अन्यतमम् એક एक, जिह्वावैषयिकम् જીભથી ગ્રહણ કરાતો जिह्वासे ग्रहण करने योग्य, भावम् ભાવ भाव, आचक्षते કહે છે कहते हैं, स पुन અને તે और वह, उदकात् જલથી जलसे, अनन्य. इति અભિન્ન છે अभिन्न है,

8-(1) Bhadrakapya said, "Taste is one. The experts declare it to be one of the five sense-objects, and is experienced by the palate and is not different from water".

द्वौ रसाविति शाकुन्तेयो ब्राह्मणः, छेदनीय उपशमनीयश्चेति ।

शाकुन्तेय. શાકુન્તેય शाकुन्तेय, ब्राह्मणः બ્રાહ્મણે કહ્યું ब्राह्मणने कहा, रसौ રસો रस, द्वौ इति બે છે दो हैं, छेदनीयः છેદનીય छेदनीय, उपशमनीय च इति અને ઉપશમનીય और उपशमनीय,

8-(2). The brahmana named Sakunteya declared, "Tastes are two. One is depletive and the other impletive".

८ य–त (थ.)

,, शाकुन्तेय.–शाकुनेय. (ग.)

त्रयो रसा इति पूर्णाक्षो मौद्गल्यः, छेदनीयोपशमनीयसाधारणा इति ।

मौद्गल्यः મૌદ્ગલ્ય मौद्गल्य, पूर्णाक्ष. પૂર્ણાક્ષે કહ્યું पूर्णाक्षने कहा, रसाः રસો रस, त्रयः इति ત્રણ છે तीन हैं, छेदनीय- છેદનીય छेदनीय, उपशमनीय- ઉપશમનીય उपशमनीय, साधारणा· इति અને સાધારણ और साधारण;

8-(3). Maudgalya Purnaksha averred, "Tastes are three—depletive, impletive and the common intermediate one".

चत्वारो रसा इति हिरण्याक्षः कौशिकः, स्वादुर्हितश्च स्वादुरहितश्चास्वादुर्हितश्चास्वादुरहितश्चेति।

कौशिक. કૌશિક कौशिक, हिरण्याक्ष. હિરણ્યાક્ષે કહ્યું हिरण्याक्षने कहा, रसा રસો रस, चत्वार. इति ચાર છે चार हैं, स्वादुः हित. च સ્વાદુ અને હિતકર स्वादु और हितकर, स्वादु अहित. च સ્વાદુ અને અહિતકર स्वादु और अहितकर, अस्वादु हितः च અસ્વાદુ અને હિતકર अस्वादु और हितकर, अस्वादु· अहित. च इति તથા અસ્વાદુ અને અહિતકર तथा अस्वादु और अहितकर;

8-(4). Then Kausika Hiranyaksha asserted, "Tastes are four in number–palatable and wholesome, palatable but unwholesome, unpalatable but wholesome, and unpalatable and unwholesome."

पञ्च रसा इति कुमारशिरा भरद्वाजः, भौमौदकाग्नेयवायव्यान्तरिक्षाः ।

कुमारशिरा કુમારશિરા कुमारशिरा, भरद्वाजः ભરદ્વાજે કહ્યું भरद्वाजने कहा, रसा રસો रस, पञ्च इति પાંચ છે पाच हैं, भौम- ભૂમિસંબંધી भूमिसबन्धी, औदक- જલસંબંધી जलसंबन्धी, आग्नेय- અગ્નિસંબંધી अग्निसबन्धी, वायव्य- વાયુસંબંધી वायुसबन्धी, आन्तरिक्षा. અને આકાશસંબંધી और आकाशसंबन्धी;

८ छेदनीयोपशमनीयसाधारणा इति–छेदनीयोपशमनीयौ साधारणश्चेति (घ.)

कफेऽनुपानं रूक्षोष्णं क्षये मांसरसः परम् ॥३२१॥

मारुते વાયુમાં वायुमें, स्निग्धोष्णम् સ્નિગ્ધ અને ઉષ્ણ स्निग्ध एव उष्ण, पित्ते પિત્તમાં पित्तमें, मधुरशीतलम् મધુર અને શીતલ मधुर एव शीतल, कफे તથા કફમા तथा कफमें, रूक्षोष्णम् રૂક્ષ અને ઉષ્ણ रूक्ष एव उष्ण, अनुपानम् અનુપાન अनुपान, शस्तम् શ્રેષ્ઠ છે उत्तम है, क्षये તથા ક્ષયમાં और क्षयमें, मांसरसः માંસરસનુ અનુપાન मांसरसका अनुपान, परम શ્રેષ્ઠ છે उत्तम है ॥ ३२१ ॥

321 Unctuous and hot drinks in conditions of vata, sweet and cooling ones in those of pitta, dry and hot ones in kapha, and meat-juices in wasting are considered the best.

उपवासादिषु पयसोऽनुपानत्वम्—

उपवासाध्वभाष्यस्त्रीमारुतातपकर्मभिः ।
क्लान्तानामनुपानार्थं पयः पथ्यं यथाऽमृतम् ॥३२२॥

उपवास- ઉપવાસ उपवास, अध्व- બહુ ચાલવું मुसाफरी, भाष्य- બહુ બોલવુ अधिक बोलना, स्त्री- સ્ત્રીસેવન स्त्रीसेवन, मारुत- તથા પવન वायु, आतप- તડકો धूप, कर्मभि અને કામથી और कार्यसे, क्लान्तानाम् થાકી ગયેલા મનુષ્યને थके हुए मनुष्योंके, अनुपानार्थम् અનુપાન માટે अनुपानके लिए, पयः દૂધ दूध, अमृतम् यथा અમૃત જેવુ अमृतके समान, पथ्यम् પથ્ય છે पथ्य है ॥ ३२२ ॥

322. For those fatigued by fasting, travel, lecturing, society of women, wind, sun and exertion, milk as a post-prandial drink is as wholesome as nectar.

कृशाना सुरानुपानम्, स्थूलदेहाना मधूदकमनुपानम्—

सुरा कृशानां पुष्ट्यर्थमनुपानं विधीयते ।
कार्श्यार्थं स्थूलदेहानामनु शस्तं मधूदकम् ॥३२३॥

कृशानाम् કૃશ મનુષ્યોની कृश मनुष्योंकी, पुष्ट्यर्थम् પુષ્ટિ માટે पुष्टिके लिए, सुरा સુરાના सुराके, अनुपानम् અનુપાનનું अनुपानका, विधीयते વિધાન કરવામાં

---

३२० समुद्दिष्टामशीति चतुरुत्तराम्–समुद्दिष्टा मशीतिश्चतुरुत्तरा (ग. घ)

,, चतुरुत्तराम्–च गुणोत्तराम् (प)

३२२ अध्वभाष्यस्त्री–अध्वभारस्त्री (थ)

३२३ विधीयते–प्रशस्यते (क ग घ छ ज. ट त थ.)

,, स्थूलदेहानाम्–अतिनिद्राणाम् (थ. प)

,, अनुशस्त मधूदकम्–अनुपान मधूदकम् (ढ.)

આવે છે विधान किया जाता है, स्थूलदेहानाम् સ્થૂલ શરીરવાળાઓને स्थूल शरीरवालोंको, कार्श्यार्थम् કૃશ કરવા માટે कृश करनेके लिए, मधूदकम् મધૂદકનુ मधूदकका, अनु અનુપાન अनुपान, शस्तम् પ્રશસ્ત છે उत्तम है ॥ ३२३ ॥

323. Sura wine is to be prescribed as a post-prandial drink for building up the emaciated. Hydromel (honey-water) is recommended as a post-prandial drink for reducing the corpulent.

मद्यानुपानस्याधिकारिण —

अल्पाग्नीनामनिद्राणां तन्द्राशोकभयक्लमैः ।
मद्यमांसोचितानां च मद्यमेवानुशस्यते ॥ ३२४॥

तन्द्रा- તન્દ્રા तन्द्रा, शोक શોક शोक, भय- ભય भय, क्लमैः તથા ક્લમથી एव क्लमसे, अल्पाग्नीनाम् જેઓ મદાગ્નિ હોય जिनको मदाग्नि हो, अनिद्राणाम् જેઓને નિદ્રા આવતી ન હોય जिनको निंद न आती हो, मद्यमांसोचितानाम् च અને જેઓ મદ્ય તથા માંસના અભ્યાસીઓ હોય और जिनको मद्य तथा मास सात्म्य हो उनके लिए, मद्यम् મદ્યનુ मद्यका, एव જ ही, अनुशस्यते અનુપાન પ્રશસ્ત છે अनुपान उत्तम है ॥ ३२४ ॥

324. For those suffering from weak gastric fire and insomnia as the result of torpor, grief, fear and fatigue and for those accustomed to wine and meat, wine is prescribed as a post-prandial drink.

अनुपानस्य गुणा —

अथानुपानकर्मगुणान् प्रवक्ष्यामः-अनुपानं तर्पयति, प्रीणयति, ऊर्जयति, बृंहयति, पर्याप्तिमभिनिर्वर्तयति, भुक्तमवसादयति, अन्नसङ्घातं भिनत्ति, मार्दवमापादयति, क्लेदयति, जरयति, सुखपरिणामितामाशुव्यवायितां चाहारस्योपजनयतीति ॥ ३२५॥

अथ હવે इसके आगे, अनुपानकर्म- અનુપાનનાં કર્મ अनुपानके कर्म, गुणान् અને ગુણો और गुणको, प्रवक्ष्यामः કહેશુ कहेंगे, अनुपानम् અનુપાન अनुपान, तर्पयति તર્પણ કરે છે संतर्पण करता है, प्रीणयति પ્રસન્નતા કરે છે प्रसन्नता करता है, ऊर्जयति ઉત્સાહ આપે છે उत्साह देता है, बृंहयति બૃંહણ કરે છે बृंहण करता है, पर्याप्तिम् તૃપ્તિ तृप्ति, अभिनिर्वर्तयति કરે છે करता है, भुक्तम् ખાધેલ અન્નને खाये अन्नको, अवसादयति શિથિલ કરે છે शिथिल करता है, अन्नसङ्घातम् અન્નના સમૂહને अन्नके समूहको, भिनत्ति તોડે છે तोड़ता है, मार्दवम् મૃદુતા कोमलता, आपादयति લાવે છે उत्पन्न करता है, क्लेदयति ક્લેદ કરે છે क्लिन्न करता है, जरयति પચાવે છે पचाता है, आहारस्य અને આહારને एवं आहारका, सुख- સુખપૂર્વક सुखसे, परिणामिताम् પચનારો पच जाना, आशुव्यवायिताम् च અને શરીરમાં તુરત વ્યાપ્ત થનારો शीघ्र शरीरमें व्याप्त हो जाना, उपजनयति इति કરે છે उत्पन्न करता है ॥ ३२५ ॥

325. Now we shall speak of the qualities and actions of post-prandial drink. Post-prandial drink gives nourishment, pleasure, energy, roborance, sense of satisfaction, settles down the food eaten, breaks up the mass of food, imparts softness, liquefies, digests and brings about quick assimilation and diffusion in the body.

भवति चात्र—

अनुपानं हितं युक्तं तर्पयत्याशु मानवम् ।
सुखं पचति चाहारमायुषे च बलाय च ॥३२६॥

---

३२५. अथानुपानकर्मगुणान् प्रवक्ष्याम -अथानुपानकर्म प्रवक्ष्यामि (ख)
,, कर्मगुणान् प्रवक्ष्याम -गुणकर्म वक्ष्यामि (ग)

३२५ भुक्तमवसादयति-भक्तमवसादयति (ख)
,, उपजनयति-जनयति (च.)

अत्र च આ વિષયમાં इस विषयमें, भवति શ્લોક છે કે श्लोक है कि, युक्तम् પ્રયોજેલું प्रयुक्त किया हुआ, हितम् હિતકર हितकारी, अनुपानम् અનુપાન अनुपान, मानवम् મનુષ્યને मनुष्यको, आशु જલદી शीघ्र, तर्पयति તૃપ્ત કરે છે तृप्त करता है, आहारम् च તથા આહારને एवं आहारको, आयुषे च આયુષ आयु, बलाय च અને બળની પ્રાપ્તિ માટે एवं बलकी प्राप्तिके लिए, सुखम् સુખેથી सुखपूर्वक, पचति પચાવે છે पचाता है ॥ ३२६ ॥

Here is a verse again :—

326. Post-prandial drink that is rightly administered satisfies the man immediately and digests the food happily and gives life and strength.

येषां जलानुपानं प्रतिषिद्धम्—

नोर्ध्वाङ्गमारुताविष्टा न हिक्काश्वासकासिनः ।
न गीतभाष्याध्ययनप्रसक्ता नोरसि क्षताः ॥३२७॥
पिबेयुरुदकं भुक्त्वा तद्धि कण्ठोरसि स्थितम् ।
स्नेहमाहारजं हत्वा भूयो दोषाय कल्पते ॥३२८॥

भुक्त्वा જમીને भोजन करके, उदकम् પાણી जल, ऊर्ध्वाङ्ग- ઉપલાં અંગોમાં ऊपरके अंगोमें, मारुत- વાયુના वायुका, आविष्टा. પ્રકોપવાળાઓએ प्रकोप होने पर, न ન નહી, हिक्का- હેડકી हिक्का, श्वास- શ્વાસ श्वास, कासिन. અને ઉધરસવાળાઓએ और कासमें, न ન नही, गीत- ગીત गीत, भाष्य- ભાષણ भाषण, अध्ययन- અને ભણતરમાં तथा अध्ययनमें, प्रसक्ता લાગેલાઓએ लगे रहनेवालोंको, न ન नहीं, उरसि क्षता. અને ઉર ક્ષતવાળાઓએ और उर क्षतवालोंको, न ન नहीं, पिबेयु પીવુ જોઈએ पीना चाहिए, हि કારણકે क्योंकि, तत् તે પાણી वह पानी, कण्ठ-उरसि કંઠ અને છાતીમાં कठ और उरमें, स्थितम् રહેલા स्थित, आहारजम् આહારજન્ય आहारजन्य, स्नेहम् સ્નેહનો स्नेहका, हत्वा નાશ કરી नाश करके, भूयः બહુ अधिक, दोषाय દોષ दोषको, कल्पते કરવા સમર્થ થાય છે करनेमें समर्थ होता है ॥ ३२७-३२८ ॥

327-328. Neither those in whom the vata is provoked in the upper parts of the body nor those that suffer from hiccup, dyspnea or cough, nor those that are engaged in singing, lecturing or studying, nor those that are suffering from pectoral lesions should drink water after eating; for it takes away from the throat and chest the unctuous quality of the meal eaten and leads to great morbidity.

द्रव्याणां कार्त्स्न्येन नामनिर्देशस्याशक्यत्वादेकदेशेन कथनम्—

अन्नपानैकदेशोऽयमुक्तः प्रायोपयोगिकः ।
द्रव्याणि न हि निर्देष्टुं शक्यं कार्त्स्न्येन नामभिः ॥३२९॥

अयम् આ यह, अन्नपानैकदेश અન્નપાનનો એક ભાગ अन्नपानका एक भाग, प्रायोपयोगिक જે ઘણુ ખરુ ઉપયોગમાં આવે છે जो प्राय करके उपयोगमें लिया जाता है, उक्त. તે કહી બતાવ્યો છે वह कह दिया है, हि કારણકે क्योंकि, द्रव्याणि દ્રવ્યોનો द्रव्योंका, कार्त्स्न्येन સંપૂર્ણપણે संपूर्णतासे, नामभि. નામ લઈ લઈને पृथक् पृथक् नामद्वारा, निर्देष्टुम् નિર્દેશ કરવો निर्देश करना, न शक्यम् શક્ય નથી शक्य नहीं है ॥ ३२९ ॥

329. The foods and drinks that are generally in use are described; for it is not possible to indicate the totality of substances by their names.

अनुक्तानां द्रव्याणां गुणकर्मादीनां ज्ञाने उपायाः—

यथा नानौषधं किंचिद्देशजानां वचो यथा ।
द्रव्यं तत्तत्तथा वाच्यमनुक्तमिह यद्भवेत् ॥३३०॥

यथा જેથી क्योंकी, किंचित् કોઈપણ દ્રવ્ય कोई भी द्रव्य, अनौषधम् ઔષધ ન હોય એવુ औषध न हो ऐसी

३२८. हत्वा—गत्वा (च. ध.)

३२९ अन्नपानैक°—अनुपानैक° (ट द प)
,, द्रव्याणि न हि—द्रव्य गु न हि (क ध. च ट)

वात, न નથી नहीं है, यत् તેથી જેને જેને ततः जो जो, इह અહીં यहां, अनुक्तम् भवेत् ન કહ્યું હોય न कहा गया हो, तत् તે તે દ્રવ્યને उस उस द्रव्यको, यथा તેના સંબંધમાં જેવું उसके संबंधमें जैसा, देशजानाम् તે તે દેશના લોકોનું उस उस देशके मनुष्योंका, वचः કથન હોય कथन हो, तथा તે પ્રમાણે જ वैसा ही, वाच्यम् તેને કહેવું उसे कहना चाहिए ॥ ३३० ॥

330. Since there is no substance which may not be used as a medicine, the substances not spoken of here are to be assessed with reference to their qualities according to the opinion of the people in whose country they are found.

चरः शरीरावयवाः स्वभावो धातवः क्रिया ।
लिङ्गं प्रमाणं संस्कारो मात्रा चास्मिन् परीक्ष्यते ३३१

अस्मिन् આ અન્નપાનના વિષયમાં इस अन्नपानके विषयमें, चर દેશ અને ભક્ષ્ય देश और भक्ष्य. शरीरावयवा શરીરના અવયવો शरीरके अवयव, स्वभाव સ્વભાવ स्वभाव, धातव ધાતુઓ धातुएँ, क्रिया ક્રિયા क्रिया, लिङ्गम् સ્ત્રી, પુરુષ અથવા નપુંસક स्त्री, पुरुष अथवा नपुंसक, प्रमाणम् પ્રમાણ प्रमाण, संस्कारः સંસ્કાર सस्कार, मात्रा च અને માત્રાની और मात्राकी, परीक्ष्यते પરીક્ષા કરવામાં આવે છે परीक्षा की जाती है ॥ ३३१ ॥

331. An animal's food and habitat, body-parts, constitution, body elements, activity, sex, size, mode of preparation and measure are herein explained.

प्राणिना देश-भक्ष्य-विशेषेण गुरुलाघवम्—

चरोऽनूपजलाकाशधन्वाद्यो भक्ष्यसंविधिः ।
जलजानूपजाश्चैव जलानूपचराश्च ये ॥ ३३२ ॥
गुरुभक्ष्याश्च ये सत्त्वाः सर्वे ते गुरवः स्मृताः ।
लघुभक्ष्यास्तु लघवो धन्वजा धन्वचारिणः ॥३३३॥

३३१ चास्मिन्—चात्र (ज)
३३३ सर्वे-प्राय. (ग)

अनूप- આનૂપ आनूप, जल- જલ जल, आकाश- આકાશ आकाश, धन्व- અને જાંગલ और धन्व, आद्यः વગેરે દેશ आदि देश, भक्ष्यसंविधि. તથા ભક્ષ્ય तथा भक्ष्य, चर. એ ચર છે वह चर है, ये सत्त्वाः જે પ્રાણીઓ जो प्राणि, जलज- જલમાં જન્મેલાં जलज, आनूपजा. च एव અને આનૂપ દેશમાં જન્મેલાં और आनूपजन्य, जलानूपचरा च તેમજ જલચર અને આનૂપચર છે एवं जलचर तथा आनूपचर हैं, ये च અને જે પ્રાણીઓ और जो प्राणियों, गुरुभक्ष्याः ભારે ખોરાક ખાનારાં છે गुरु पदार्थ खाते हैं, ते सर्वे ते सर्वे वे सब, गुरवः પચવામાં ભારે गुरु; स्मृता· કહેવાય છે कहे गये हैं, धन्वजा અને ધન્વદેશમાં ઉત્પન્ન થયેલાં और धन्वदेशमें उत्पन्न हुए, धन्वचारिणः તેમજ ધન્વદેશમાં ફરનારાં एवं धन्वदेशमें विचरनेवाले, लघुभक्ष्या तु અને હલકું ખાનારાં પ્રાણીઓ और लघु पदार्थोंको खानेवाले प्राणि, लघव. પચવામાં હલકાં કહેવાય છે पचनेमें लघु कहे गये हैं ॥ ३३२-३३३ ॥

332-333. Wet-land, water, sky, arid-land and the feed constitute an animal's habitat and food. Animals which are native to water and wet-land or eat heavy things, are all to be regarded as heavy. The light feeders are light, such as those native to arid-land and moving in arid-land.

शरीरावयवेषु गुरुलाघवम्—

शरीरावयवाः सक्थिशिरःस्कन्धादयस्तथा ।
सक्थिमांसाद्गुरुः स्कन्धस्ततः क्रोडस्ततः शिरः३३४
वृषणौ चर्म मेढ्रं च श्रोणी वृक्कौ यकृद्गुदम् ।
मांसाद्गुरुतरं विद्याद्यथास्वं मध्यमस्थि च ॥३३५॥

३३४ सक्थि .. . शिर.—सक्थिमासाद् गुरुतर स्कन्धक्रोड-शिरस्पदाम् (ग च. ब.)
,, तत शिर —शिरस्पदम् (द.)
३३५. चर्म मेढ्र—वस्तिमेढ्र (प)
,, श्रोणी वृक्कौ—श्रोणिवुक्कौ (च.)

तथा तथा तथा, सक्थि- સક્થિ सक्थि, शिर.- મસ્તક शिर, स्कन्ध- સ્કંધ स्कन्ध, आदय વગેરે आदि, शरीरावयवा શરીરના અવયવો છે शरीरके अवयव हैं, सक्थिमांसात् સક્થિના માંસથી सक्थिके माससे, स्कन्ध સ્કન્ધ स्कन्ध, गुरुः ભારે છે भारी होता है, तत. તેનાથી स्कन्धसे, क्रोडः ક્રોડ क्रोड, तत અને તેનાથી और क्रोडसे, शिर· મસ્તક ભારે છે शिर भारी है, यथास्वम् પોતપોતાના શરીરને અનુસરી જોતાં अपने अपने शरीरके अनुसार, मासात् માંસથી मासकी अपेक्षा, वृषणौ વૃષણ दोनों वृषण, चर्म ચર્મ चर्म, मेढ्रम् શિશ્ન मेढ्र, श्रोणी શ્રોણી श्रोणी, वृक्कौ બેઉ વૃક્ક दोनों वृक्क, यकृत् યકૃત્ यकृत्, गुदम् च ગુદા गुदा, मध्यम् મધ્ય દેહ मध्य देह, अस्थि च અને હાડકાં और अस्थि, गुरुतरम् વધારે ભારે अधिक भारी, विद्यात् જાણવાં जाने ॥ ३३४-३३५ ॥

334-335. The body-limbs are the thigh-bone, head, shoulder and others. The shoulder is heavier than the flesh of the thigh-bone. The chest is heavier than the shoulder and the head is heavier than the chest. The testes, skin, phallus, hips, kidneys, liver, rectum, trunk and bone-marrow are to be regarded as heavier than the flesh in the body of an animal.

स्वभाद् गुरुलाघवम्—

स्वभावाल्लघवो मुद्गास्तथा लावकपिञ्जलाः ।
स्वभावाद्गुरवो माषा वराहमहिषास्तथा ॥ ३३६ ॥

मुद्गा મગ मूंग, तथा તથા तथा, लावकपिञ्जला લાવાં અને કપિંજલ लाव और कपिञ्जल, स्वभावात् સ્વભાવથીજ स्वभावसे ही, लघव હલકાં છે लघु हैं, माषाः અડદ उड़द, तथा તથા तथा, वराहमहिषा. સૂવર અને પાડા सूअर और भैंस, स्वभावात् સ્વભાવથીજ स्वभासे ही, गुरव· ભારે છે गुरु हैं ॥ ३३६ ॥

336. By nature green-gram is light; so, too, are quail and grey-partridge. Black-gram is by nature heavy and the fleshes of hog and buffalo too are likewise.

धातूना गुरुलाघवम्—

धातूनां शोणितादीनां गुरुं विद्याद्यथोत्तरम् ।
अलसेभ्यो विशिष्यन्ते प्राणिनो ये बहुक्रियाः ॥ ३३७ ॥

शोणितादीनाम् રક્ત વગેરે रक्तादि, धातूनाम् ધાતુઓમાં धातुओंमे, यथोत्तरम् ઉત્તરોત્તર ધાતુને उत्तरोत्तर धातुको, गुरुम् વધારે ભારે अधिक गुरु, विद्यात् જાણવો जानना चाहिए, ये જે जो, बहुक्रिया બહુ કામ કરનાર अधिक क्रियाशील, प्राणिन પ્રાણીઓ હોય છે होते हैं, अलसेभ्य તેઓ આળસુ પ્રાણીઓથી वे आलसी प्राणियोंकी, विशिष्यन्ते હલકાપણામાં ચઢી જાય છે अपेक्षा लघु होते हैं ॥ ३३७ ॥

337. The blood and the other body-elements should be regarded as increasingly heavy in their due order. Creatures that are given to much activity are lighter than those that are lethargic.

स्त्रीपुंसभेदेन गुरुलाघवम्—

गौरवं लिङ्गसामान्ये पुंसां स्त्रीणां तु लाघवम् ।
महाप्रमाणा गुरवः स्वजातौ लघवोऽन्यथा ॥ ३३८ ॥

लिङ्गसामान्ये એકજ જાતનાં પ્રાણીઓમાં एक ही जातिके प्राणियोंमें, पुसाम् નરનુ नरका, गौरवम् ભારેપણુ છે भारीपन है, स्त्रीणाम् तु અને સ્ત્રીનું और स्त्रीका, लाघवम् હલકાપણુ છે हलकापन है, स्वजातौ પોતાની જાતમાં अपनी जातिमें, महाप्रमाणा મોટા પ્રમાણવાળાં પ્રાણીઓ बड़े शरीरवाले प्राणि, गुरव ગુરુ છે गुरु हैं, अन्यथा અને નાનાં શરીરવાળાં પ્રાણીઓ और छोटे शरीरवाले प्राणि, लघव લઘુ હોય છે लघु होते हैं ॥ ३३८ ॥

338. Heaviness is the characteristic of the males in general, while lightness is the characteristic of females.

Those that are huge of size in each class are heavy and those that are otherwise are light.

संस्कारापेक्षं गुरुलाघवम्—

गुरूणां लाघवं विद्यात् संस्कारात् सविपर्ययम् ।
व्रीहेर्लाजा यथा च स्युः सक्तूनां सिद्धपिण्डिकाः॥३३९॥

संस्कारात् સંસ્કારથી संस्कारसे, गुरूणाम् ગુરુ પદાર્થોનું गुरु पदार्थोंका, लाघवम् હલકાપણુ हलकापन, सविपर्ययम् विद्यात् તથા હલકા પદાર્થોનુ ભારેપણુ જાણવુ तथा हलके पदार्थोंका भारीपन जानना चाहिए, यथा च જેમકે जैसे कि, व्रीहेः ભારે વ્રીહિધાન્યમાંથી भारी व्रीहिधान्यसे, लाजाः સંસ્કારથી બનાવેલી લાજા संस्कारद्वारा बनाई हुई लाजा, स्युः વ્રીહિધાન્યથી હલકી થાય છે व्रीहिधान्यसे हलकी होती है, सक्तूनाम् અને હલકા સાથવામાંથી और हलके सत्तूओंसे, सिद्धपिण्डिका· સંસ્કારથી બનાવેલાં પિંડિયાં સાથવાથી ભારે થાય છે संस्कार द्वारा बनाई हुई पिण्डिकायें सत्तूओंसे भारी होती हैं ॥ ३३९ ॥

339. The heavy articles, it should be known, become light by preparation and the light ones become heavy just as rice becomes light when roasted and roasted corn flour becomes heavy when prepared into balls and cooked.

गुरुलाघवे मात्रायाः कारणत्वम्—

अल्पादाने गुरूणां च लघूनां चातिसेवने ।
मात्रा कारणमुद्दिष्टं द्रव्याणां गुरुलाघवे ॥ ३४० ॥

गुरूणाम् ગુરુ પદાર્થોને गुरु पदार्थोंके, अल्प-आदाने થોડા ખાવામાં थोड़ा खानेमें, लघूनाम् च તેમજ લઘુ પદાર્થોને एवं लघु पदार्थोंके, अति-सेवने અધિક ખાવામાં अधिक खानेमें, द्रव्याणाम् દ્રવ્યનુ द्रव्यका, गुरु-लाघवे જે ગુરુપણું કે લઘુપણુ થાય છે તેમાં जो गुरुत्व वा लघुत्व होता है उसमें, मात्रा માત્રાને જ मात्राको ही, कारणम् કારણ कारण, उद्दिष्टम् કહ્યુ છે कहा है ॥३४०॥

340. The proper measure of heavy and light articles of diet has been described as intake of heavy articles in small measure and of light ones in a large measure.

गुरूणामल्पमादेयं लघूनां तृप्तिरिष्यते ।
मात्रां द्रव्याण्यपेक्षन्ते मात्रा चाग्निमपेक्षते ॥३४१॥

गुरूणाम् ગુરુ પદાર્થો गुरु पदार्थोंका, अल्पम् થોડા પ્રમાણમાં थोड़ा, आदेयम् ખાવા सेवन करना चाहिए, लघूनाम् અને લઘુ પદાર્થો लघु द्रव्योंका, तृप्ति तृप्तिપર્યંત तृप्तिपर्यंत, इष्यते ખાવા જોઈએ सेवन करना चाहिए, द्रव्याणि દ્રવ્યો द्रव्य, मात्राम् માત્રાની मात्राकी, अपेक्षन्ते અપેક્ષા રાખે છે अपेक्षा करते हैं, मात्रा च અને માત્રા और मात्रा, अग्निम् અગ્નિની अग्निकी, अपेक्षते અપેક્ષા રાખે છે अपेक्षा करती है ॥ ३४१ ॥

341. Hence heavy articles should be taken in small measure and light ones to full satisfaction. Articles of diet should be taken in proper measure and the proper measure should be in accordance with the strength of gastric fire.

मात्राया अग्निबलापेक्षित्वम्—

बलमारोग्यमायुश्च प्राणाश्चाग्नौ प्रतिष्ठिताः ।
अन्नपानेन्धनैश्चाग्निर्ज्वलति व्येति चान्यथा ॥ ३४२॥

बलम् બળ बल, आरोग्यम् આરોગ્ય आरोग्य, आयु च આયુષ્ય आयु, प्राणा च અને પ્રાણ और प्राण, अग्नौ અગ્નિને ये अग्निके, प्रतिष्ठिताः આશ્રયે રહેલા છે आश्रित हैं, अग्नि च અને અગ્નિ और अग्नि, अन्नपान-इन्धनै અન્નપાનરૂપ બળતણથી अन्नपानरूप

३३९. सिद्धपिण्डिका –सिद्धपिण्डकाः (घ.)

३४१. मात्रां द्रव्याण्यपेक्षन्ते–मात्रामपेक्षते द्रव्यम् (च, भ)

३४२. ज्वलति व्येति चान्यथा–दीप्यते शाम्यतेऽन्यथा (क ग, ख, च, ध, भ.)

इन्धनसे, ज्वलति પ્રદીપ્ત રહે છે जलती रहती है, अन्यथा च અને ન મળવાથી और इसके न मिलनेसे, व्येति ક્ષીણ થાય છે बुझ जाती है ॥ ३४२ ॥

342. Strength, health, longevity and the vital breath are dependent on the state of the gastric fire, and the gastric fire burns, fed by the fuel of food and drink, or dwindles when deprived of them.

गुरुलाघवचिन्ता यैः कार्या यैश्च न कार्या—

गुरुलाघवचिन्तेयं प्रायेणाल्पबलान् प्रति ।
मन्दक्रियाननारोग्यान् सुकुमारान्सुखोचितान् ३४३

प्रायेण ઘણું કરીને प्राय करके, अल्पबलान् અલ્પ બળવાળા अल्प बलवाले, मन्दक्रियान् ધીમું કામ કરનાર मन्दक्रियाशील, अनारोग्यान् આરોગ્યરહિત रोगी, सुकुमारान् કોમળતાવાળા सुकुमार, सुखोचितान् प्रति અને સુખના અભ્યાસીઓ માટે तथा आरामकी जिन्दगी बितानेवालोंके लिए, इयम् આ इस, गुरुलाघव- ગુરુ અને લઘુનો गुरु और लघुका, चिन्ता વિચાર છે विचार है ॥ ३४३ ॥

343. This consideration of heavy and light articles is with reference to those that are generally weak, indolent, unhealthy, delicate of health and given to luxury.

दीप्ताग्नयः खराहाराः कर्मनित्या महोदराः ।
ये नराः प्रति तांश्चिन्त्यं नावश्यं गुरुलाघवम् ॥३४४॥

ये જે जिन, नराः મનુષ્યો मनुष्योंकी, दीप्ताग्नय. પ્રદીપ્ત અગ્નિવાળા अग्नि दीप्त है, खर-आहाराः કઠોર પદાર્થ ખાનારા जो कठिन भोजन करनेवाले हैं, कर्म-नित्याः નિત્ય કામ કરનાર परिश्रमी हैं, महोदरा અને મોટાં પેટવાળા છે और विशाल उदरवाले हैं, तान् તેઓની उनके, प्रति બાબતમાં विषयमें, गुरुलाघवम् ગુરુતા અને લઘુતા गुरुलघुका भाव, अवश्यम् અવશ્ય अवश्य, न चिन्त्यम् વિચાર કરવા યોગ્ય નથી विचारणीय नहीं है ॥ ३४४ ॥

344. With reference to those whose digestive fire is inflamed, who are accustomed to hard articles of diet, who are given to constant labour and have huge capacity for the consumption of food, the consideration of heavy and light qualities of things is not necessary.

हितान्नपानसेवाया फलम्—

हिताग्निर्जुहुयान्नित्यमन्तरग्निं समाहितः ।
अन्नपानसमिद्भिर्ना मात्राकालौ विचारयन् ॥३४५॥

ना પુરુષે पुरुषको, मात्राकालौ માત્રા અને કાળને मात्रा एव कालका, विचारयन् વિચાર કરી विचार करते हुए, समाहित સાવધાન થઈ सावधान होकर, अन्तरग्निम् જઠરાગ્નિમાં अन्तरग्निमें, हिताभि. હિતકર हितकर, अन्नपान- અન્નપાનરૂપ अन्नपानरूप, समिद्भिः સમિધવડે समिधाओंसे, नित्यम् નિત્ય नित्य, जुहुयात् હોમ કરવો જોઈએ हवन करना चाहिए ॥ ३४५ ॥

345. The self-controlled man should always feed his gastric fire with the fuel of wholesome food and drink, mindful of the consideration of measure and time.

आहिताग्निः सदा पथ्यान्यन्तरग्नौ जुहोति यः ।
दिवसे दिवसे ब्रह्म जपत्यथ ददाति च ॥ ३४६ ॥
नरं निःश्रेयसे युक्तं सात्म्यज्ञं पानभोजने ।
भजन्ते नामयाः केचिद्भाविनोऽप्यन्तराहते ॥३४७॥

आहिताग्नि સાત્મ્યથી અગ્નિને વ્યવસ્થિત ટકાવી રાખનાર सात्म्यसे व्यवस्थायुक्त अग्निवाला, यः જે મનુષ્ય जो मनुष्य, अन्तरग्नौ અંદરના અગ્નિમાં अन्तरग्निमें, सदा હમેશાં सदा, पथ्यानि પથ્ય પદાર્થો पथ्य वस्तुओंसे,

३४३ प्रायेणाल्पबलान्–प्रायेणाल्पधनान् (प)
,, मन्दक्रियाननारोग्यान्–मन्दक्रियानलारोग्यान् (क)
,, ,, –मन्दकर्मानलारोग्यान् (ग च.)

३४६. जपति–यजति (ग)

जुहोति હોમે છે हवन करता है, दिवसे दिवसे રોજ રોજ प्रतिदिन, ब्रह्म ઓંકાર આદિ મંત્રનો ओंकार आदि मंत्रका, जपति જપ કરે છે जप करता है, अथ ददाति च અને દાન દેછે और दान करता है, निःश्रेयसे તે કલ્યાણ માટે कल्याणके लिए, युक्तम् લાગેલા लगे, पानभोजने અને પીવા તથા ખાવામાં और खानपानमें, सात्म्यज्ञम् સાત્મ્યને જાણનાર सात्म्यको समझनेवाले, नर પુરુષને उस मनुष्यको, अन्तरात् ખાસ કારણ विशेष कारणके, ऋते વગર बिना, भाविन ભવિષ્યમાં થનારા भविष्यमें होनेवाले, केचित् કોઈ कोई, अपि પણ भी, आमया. રોગ रोग, न भजन्ते થતા નથી नहीं होते ॥ ३४६-३४७ ॥

346-347. The man whose gastric fire is well tended, who feeds it duly with wholesome diet, who is given to daily meditation, charity and the pursuit of spiritual salvation, and who takes food and drinks that are homologatory to him, will not fall victim to diseases even in his succeeding birth except for special reasons.

षट्त्रिंशतं सहस्राणि रात्रीणां हितभोजनः ।
जीवत्यनातुरो जन्तुर्जितात्मा संमतः सताम् ॥३४८॥

हितभोजनः હિતકર ભોજન કરનાર हितभोजन करनेवाला, जितात्मा જિતેન્દ્રિય जितेन्द्रिय, जन्तु. પુરુષ पुरुष, सताम् સત્પુરુષોનુ साधु जनोंसे, संमतः સંમાન પામી पूजित, अनातुरः તેમજ નીરોગી બનીને एव नीरोगी होकर, रात्रीणाम् षट्त्रिंशतम् છત્રીસ હજાર રાત્રિઓ અર્થાત્ સો વર્ષ સુધી छत्तीस हजार रात्रियों अर्थात् सौ वर्षतक, जीवति જીવે છે जीता है ॥ ३४८ ॥

348. The disciplined man that practises wholesome diet lives for a period of 36000 nights (hundred years), blessed by good men and free from disease.

३४८. षट्त्रिंशतं–षट्त्रिंशच्च (ग च.)

अन्नप्रशंसा—

प्राणाः प्राणभृतामन्नमन्नं लोकोऽभिधावति ।
वर्णः प्रसादः सौस्वर्यं जीवितं प्रतिभा सुखम् ॥३४९॥
तुष्टिः पुष्टिर्बलं मेधा सर्वमन्ने प्रतिष्ठितम् ।

अन्नम् અન્ન अन्न, प्राणभृताम् પ્રાણધારીઓના प्राणधारियोंके लिए, प्राणाः પ્રાણ છે प्राणरूप है, अन्नम् અન્ન તરફ अन्नके पीछे, लोकः લોક ससार, अभिधावति દોડે છે दोड़ता है, वर्ण. વર્ણ वर्ण, प्रसाद· પ્રસન્નતા प्रसन्नता, सौस्वर्यम् સુંદર સ્વર उत्तम स्वर, जीवितम् જીવિત जीवन, प्रतिभा પ્રતિભા प्रतिभा, सुखम् સુખ सुख, तुष्टिः સંતોષ तुष्टि, पुष्टिः પુષ્ટિ पुष्टि, बलम् બલ बल, मेधा અને મેધા और मेधा, सर्वम् એ સર્વ ये सब, अन्ने અન્નમાં अन्नमें, प्रतिष्ठितम् રહેલ છે आश्रित हैं ॥ ३४९½ ॥

349-349½. The life of all living things is food and all the world seeks food. Complexion, clarity, good voice, long life, understanding, happiness, satisfaction, growth, strength and intelligence are all established in food.

लौकिकं कर्म यद्वृत्तौ स्वर्गतौ यच्च वैदिकम् ॥३५०॥
कर्मापवर्गे यच्चोक्तं तच्चाप्यन्ने प्रतिष्ठितम् ।

वृत्तौ વૃત્તિ માટે जीवननिर्वाहके लिए, यत् જે जो, लौकिकम् વ્યાવહારિક કર્મ लौकिक कर्म, स्वर्गतौ સ્વર્ગની પ્રાપ્તિ માટે स्वर्गकी प्राप्तिके लिए, यत् च જે जो, वैदिकम् વૈદિક કર્મ वैदिक कर्म, अपवर्गे અને મોક્ષને માટે और मोक्षके लिए, यत् च જે जो, कर्म કર્મ कर्म, उक्तम् કહ્યુ છે कहा है, तत् च अपि તે બધું वे सब, अन्ने અન્ન ઉપરજ अन्नमें ही, प्रतिष्ठितम् આધાર રાખે છે आश्रित हैं ॥ ३५०½ ॥

350. Whatever is beneficial for worldy happiness, whatever pertains to the vedic sacrifices leading to heaven and whatever action leads to

३४९. सौस्वर्य–ऐश्वर्य (ग.)
३५०. स्वर्गतौ–सद्वृत्त (द.)

spiritual salvation is said to be established in food.

अध्यायार्थसंग्रह. —

तत्र श्लोकः—

अन्नपानगुणाः साग्र्या वर्गा द्वादश निश्चिताः ॥३५१॥
सगुणान्यनुपानानि गुरुलाघवसंग्रहः ।
अन्नपानविधावुक्तं तत् परीक्ष्यं विशेषतः ॥३५२॥

तत्र તે વિષયમાં उस विषयमें, श्लोक ઉપસંહારનો શ્લોક છે કે उपसंहारका श्लोक है कि, अन्नपानगुणा અન્નપાનના ગુણો अन्नपानके गुण, निश्चिता અને નક્કી કરેલા और निश्चित, साग्र्या પ્રધાન દ્રવ્યોવાળા प्रधान द्रव्योंवाले, द्वादश બાર बारह, वर्गा. વર્ગ वर्ग, सगुणानि ગુણસહિત गुणोंके साथ, अनुपानानि અનુપાનો अनुपान, गुरु-लाघव ગુરુતા અને લઘુતાનો गुरु और लघुको, संग्रहः સંગ્રહ संग्रह, विशेषतः ખાસ કરીને विशिष्टतासे, परीक्ष्यम् પરીક્ષા કરવામાં આવેલા ગુણો परीक्षाके विषयभूत गुण, तत् તે સઘળું वे सब, अन्नपानविधौ આ 'અન્નપાનવિધિ' અધ્યાયમાં इस 'अन्नपान-विधि' अध्यायमें, उक्तम् કહી દેખાડ્યું છે कहे गये हैं ॥ ३५१-३५२ ॥

Here is the recapitulatory verse.

351-352. The characteristics of eats and drinks, the twelve classifications of articles of diet together with the foremost of them, the post-prandial drinks with their characteristics and the statement in brief regarding heaviness and lightness of the articles of diet, have all been described in this chapter on diet and dietetics. This subject is worthy of special study.

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते श्लोकस्थानेऽन्नपानविधिर्नाम सप्तविंशोऽध्यायः ॥२७॥

इति આ પ્રમાણે इस प्रकार, अग्निवेशकृते અગ્નિવેશે રચેલા अग्निवेशसे बनाये, चरकप्रतिसंस्कृते तन्त्रे અને ચરકથી પ્રતિસંસ્કાર પામેલા આ શાસ્ત્રમાં और चरकके द्वारा संस्कृत इस शास्त्रके, श्लोकस्थाने સૂત્રસ્થાન વિષે सूत्रस्थानमें, अन्नपानविधि. 'અન્નપાનવિધિ' 'अन्नपानविधि', नाम નામનો नामका, सप्तविंश સત્તાવીસમો सताईसवाँ, अध्याय. અધ્યાય સંપૂર્ણ થયો अध्याय समाप्त हुआ ॥ २७ ॥

27. Thus in the section on General Principles in the treatise compiled by Agnivesa and revised by Caraka, the twenty-seventh chapter entitled "The Regimen of Diet and Dietetics" is completed.

अष्टाविंशोऽध्यायः ।

અઠ્ઠાવીસમો અધ્યાય अध्याय अट्ठाईसवाँ

Chapter XXVIII

विविधाशितपीतीयाध्यायोपक्रमः —

अथातो विविधाशितपीतीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥ २ ॥

अथ अतः હવે અહીંથી अब आगे, विविधाशितपीतीयम् 'વિવિધાશિતપીતીય' નામના 'विविधाशितपीतीय' नामके, अध्यायम् અધ્યાયનું अध्यायका, व्याख्यास्यामः વ્યાખ્યાન કરશું व्याख्यान करेंगे ॥ १ ॥

भगवान् ભગવાન भगवान, आत्रेय. આત્રેયે आत्रेयने, इति ह આ વિષયમાં નીચે પ્રમાણે જ इस विषयमें निम्न प्रकारसे ही, आह स्म કહેલું છે कहा है ॥२॥

1. We shall now expound the chapter entitled "The various kinds of foods and drinks".

2. Thus declared the worshipful Atreya.

---

३५१. निश्चिताः—दर्शिता. (च)

३५२. तत् परीक्ष्यम्—तत्परीक्ष्य (च. ब.)

१. अशितपीतीयम्—अशितपानीयम् (ग.)

अशितपीतादीना फलम्, धातव एव धातूनामाहार —

विविधमशितं पीतं लीढं खादितं जन्तोर्हितमन्तरग्निसन्धुक्षितबलेन यथास्वेनोष्मणा सम्यग्विपच्यमानं कालवदनवस्थितसर्वधातुपाकमनुपहतसर्वधातूष्ममारुतस्रोतः केवलं शरीरमुपचयबलवर्णसुखायुषा योजयति शरीरधातूनूर्जयति च । धातवो हि धात्वाहाराः प्रकृतिमनुवर्तन्ते ॥३॥

जन्तो· પ્રાણીને मनुष्यके, हितम् હિતકર हितकारी, विविधम् વિવિધપ્રકારનું नाना प्रकारका, अशितम् ખાધેલુ ભોજ્ય चावलादि भोज्य, पीतम् પીધેલું पेय दुग्धादि, लीढम् ચાટેલુ चटनीआदि लेह, खादितम् જમેલુ અને भक्ष्य और लड्डूआदि भक्ष्य, अन्तरग्नि- અંતરના અગ્નિથી जठराग्निसे, संधुक्षित- પ્રદીપ્ત प्रदीप्त, बलेन બળવાળી बलशाली, यथास्वेन પોતપોતાની अपनी अपनी, ऊष्मणा ગરમીથી गरमीसे, सम्यक् સરખી રીતે अच्छी प्रकार, विपच्यमानम् વિપાક પામતાં पकता हुआ, कालवत् કાળની પેઠે कालके समान, अनवस्थित- અવિશ્રાંતપણે अविश्रान्त गतिसे, सर्वधातुपाकम् સર્વધાતુઓનો પાક જેમાં થયા કરે છે એવા सब धातुओंका पाक जिसमें होता रहता है, अनुपहत- હાનિરહિત છે हानिरहित है, सर्वधातूष्म- સર્વ ધાતુઓની ગરમી सब धातुओंकी गरमी, मारुतस्रोत. તથા વાયુ અને સ્રોતો જેમાં એવા एवं वायु और स्रोतवाले, केवलम् આખા सपूर्ण, शरीरम् શરીરને शरीरमें, उपचय- પુષ્ટિ वृद्धि, बल- બલ बल, वर्ण- વર્ણ वर्ण, सुख- સુખ सुख, आयुषा અને આયુષ્યથી और आयुसे, योजयति યુક્ત કરે છે युक्त करता है, शरीरधातून् અને શરીરના ધાતુઓને एवं शरीरकी धातुओंका, ऊर्जयति च પોષે છે पोषण करता है, हि કારણકે क्योंकि, धात्वाहारा. ધાતુઓનો આહાર કરીને धातुओंका आहार करती हुई, धातव ધાતુઓ धातुएं, प्रकृतिम् સમ અવસ્થામાં अपनी प्रकृतिमें, अनुवर्तन्ते રહે છે बनी रहती हैं ॥ ३ ॥

3. The various kinds of wholesome nourishment taken by man viz., eatables, drinks, electuaries and masticables, on being well-digested by the heat of the particular body-element concerned, whose strength is kept active by the (inner) gastric fire, imbue the entire body wherein the metabolic processes of all the body-elements are constantly going on like the process of time and wherein the circulation of the body-elements and the body-channels is unimpeded—with growth, strength, complexion, happiness and life as well as replenish the body-elements. It is by being nourished with corresponding elements that the body-elements are able to maintain the body in the normal condition.

३. शरीरधातूनूर्जयति—शरीरधातनर्जयति अपि दूषयति -(प.)

आहारस्य परिणाम. —

तत्राहारप्रसादाख्यो रसः किट्टं च मलाख्यमभिनिर्वर्तते । किट्टात् स्वेदमूत्रपुरीषवातपित्तश्लेष्माणः कर्णाक्षिनासिकास्यलोमकूपप्रजननमलाः केशश्मश्रुलोमनखादयश्चावयवाः पुष्यन्ति ।

तत्र તેમાં इनमें, आहारप्रसादाख्य· આહારનો પ્રસાદ કહેવાતો आहारसे प्रसादभागरूप, रसः રસ रस, मलाख्यम् અને મલ કહેવાતો और मलरूप, किट्टम् च કિટ્ટ किट्ट, अभिनिर्वर्तते બને છે बनता है, किट्टात् કિટ્ટથી किट्टसे, स्वेद-मूत्र- પરસેવો-મૂત્ર स्वेद-मूत्र, पुरीष- મળ मल, वात- વાત वात, पित्त- પિત્ત पित्त, श्लेष्माण કફ कफ, कर्ण- કાન कान, अक्षि- આંખ आँख, नासिका- નાક नासिका, आस्य- મુખ मुख, लोमकूप- રોમકૂપ लोमकूप, प्रजननमला· તથા જનનેન્દ્રિયના મળ तथा जननेन्द्रियके मल, केश- અને વાળ एवं केश, श्मश्रु- દાઢીમૂછ श्मश्रु, लोम- રુવાડાં लोम, नख- નખ नख, आदयः વગેરે आदि, अवयवा. च અવયવો अवयव, पुष्यन्ति પોષણ પામે છે पुष्ट होते हैं,

४. तत्रा.. . . निर्वर्तते । —तत्राहार प्रसादाख्य रस किट्ट च मलाख्यमभिनिर्वर्तयति ।

,, नासिकास्य—नासास्य (च)

4-(1). From the food ingested, there are formed assimilable nutrition-fluid called the essential fluid and the excretory matter called the waste product From this waste part are produced and fed sweat, urine, feces, the three excretory humors vata, pitta and kapha, the excretions of the ear, eye, nose, mouth, hair-follicles and generative organs as well as the hairs of the head and beard, hairs of the body, nails etc.

आहाररसस्य कार्यम्—

पुष्यन्ति त्वाहाररसाद्रसरुधिरमांसमेदोऽस्थिमज्जशुक्रौजांसि पञ्चेन्द्रियद्रव्याणि धातुप्रसादसंज्ञकानि शरीरसन्धिबन्धपिच्छादयश्चावयवाः ।

आहार-रसात् આહારના રસમાંથી आहाररससे, तु વળી तो, रस- રસ रस, रुधिर- રક્ત रक्त, मांस- માંસ मास, मेद - મેદ मेद, अस्थि- હાડકાં अस्थि, मज्ज- મજ્જા मज्जा, शुक्र- વીર્ય शुक्र, ओजांसि અને ઓજસ ओज, धातुप्रसाद- ધાતુ તથા પ્રસાદ एवं धातुप्रसाद, संज्ञकानि કહેવાતા संज्ञक, पञ्च પાંચેય पाचो, इन्द्रियद्रव्याणि ઇન્દ્રિયોનાં દ્રવ્યો અર્થાત્ પાંચ મહાભૂત इन्द्रियोंके द्रव्य अर्थात् पञ्च महाभूत, शरीर-सन्धि- શરીરના સાંધા तथा शरीरकी सन्धिया, बन्ध- બંધન અર્થાત્ કંડરા સ્નાયુ વગેરે अर्थात् कण्डरा स्नायु आदि बन्धन, पिच्छा- તથા પિચ્છા और पिच्छा, आदय. च વગેરે आदि, अवयवा અવયવો अवयव, पुष्यन्ति પોષણ પામે છે पुष्ट होते हैं,

4-(2) But from the essential fluid of food are produced and fed the body nutrient fluid, blood, flesh, fat, bone, marrow, semen and the vital essence, the material of the five sensory organs known as the essence of the body-elements, as also such parts as body-joints, ligaments, mucin etc.

ते सर्वे एव धातवो मलाख्याः प्रसादाख्याश्च रसमलाभ्यां पुष्यन्तः स्वं मानमनुवर्तन्ते यथावयःशरीरम् ।

मलाख्या મલ નામના मल नामके, प्रसादाख्याः च અને પ્રસાદ નામના और प्रसाद नामके, ते તે वे, सर्वे एव સર્વેય सब, धातव ધાતુઓ धातु, रसमलाभ्यां રસ અને મળથી रस और मलसे, पुष्यन्त પોષણ પામતાં निरतर पुष्ट होते हुए, यथावयःशरीरम् વય અને શરીર અનુસાર वय और शरीरके अनुसार, स्वम् मानम् પોતાના પ્રમાણને अपने प्रमाणको, अनुवर्तन्ते સ્થિર રાખે છે अनुसरण करते हैं,

4-(3) All these body elements, both those known as effete products and those known as essential products being formed by the effete and the essential parts of body-juices according to the size and age of the body, maintain their normal proportions.

रसमलयो कार्यम्—

एवं रसमलौ स्वप्रमाणावस्थितावाश्रयस्य समधातोर्धातुसाम्यमनुवर्तयतः ।

एवम् આ પ્રમાણે इस प्रकारसे, स्वप्रमाण- પોતાના પ્રમાણમાં अपने प्रमाणमें, अवस्थितौ રહેલા रहते हुए, रसमलौ રસ અને મલ रस और मल, समधातो. સ્વસ્થ મનુષ્યના स्वस्थ मनुष्यके, आश्रयस्य શરીરનુ शरीरके, धातुसाम्यम् ધાતુસામ્ય धातुसाम्यको, अनुवर्तयत ટકાવી રાખે છે बनाये रखते हैं,

4-(4). In this way the essential and the waste fluids retaining their proper proportions keep up the balance of the elements in the normally constituted body which is their resort

निमित्ततस्तु क्षीणवृद्धानां प्रसादाख्यानां धातूनां वृद्धिक्षयाभ्यामाहारमूलाभ्यां रसः साम्यमुत्पादयत्यारोग्याय,किट्टं च मलानामेवमेव ।

४ अनुवर्तयत –अभिवर्धयत (प)
,, क्षीणवृद्धाना–क्षीणाभिवृद्धाना (प.)

रसः આહારરસ आहाररस, आहारमूलाभ्याम् આહાર છે મૂલ જેઓનું એવાં आहारमूलक, वृद्धिक्षयाभ्याम् વૃદ્ધિ અને ક્ષયવડે वृद्धि एवं क्षयद्वारा, निमित्त तु કોઈ કારણને લઈને किसी कारणसे, क्षीणवृद्धानाम् ઘટ-વધ થયેલા क्षीण या बढी हुई, प्रसाद- પ્રસાદ प्रसाद, आख्यानाम् નામની संज्ञक, धातूनाम् ધાતુઓના धातुओंकी, साम्यम् સામ્યને समानताको, आरोग्याय આરોગ્ય આપવા માટે आरोग्यताके लिए उत्पादयति ઉત્પન્ન કરે છે उत्पन्न करता है, किट्टम् च કિટ્ટ પણ किट्ट भी, मलानाम् સ્વેદ વગેરે મળોની स्वेद आदि मलोंकी, एवम् एव એ જ પ્રમાણે સમાનતા કરે છે इसी प्रकार समानता करता है;

4-(5). When for some reason the body-elements belonging to the essential category have suffered decrease or increase, then the essential nutrient fluid by undergoing the required increase or decrease as the result of the food ingested, restores the balance of this group of elements, thus making for health The waste-fluid operates in the same manner on the body-elements belonging to the "waste" category.

स्वमानातिरिक्ताः पुनरुत्सर्गिणः शीतोष्णपर्यायगुणैश्चोपचर्यमाणा मलाः शरीरधातुसाम्यकराः समुपलभ्यन्ते ॥ ४॥

स्वमान- પોતાના પ્રમાણથી अपने प्रमाणसे, अतिरिक्ताः વધી ગયેલા बढ़े हुए, पुनः વળી फिर, उत्सर्गिणः બહાર નીકળનારા वाहिर निकलने योग्य, मलाः મળો मल, शीतोष्ण- શીત ઉષ્ણ વગેરેથી शीत उष्णादि, पर्यायगुणैः च વિપરીત ગુણોવડે विपरीत गुणोंसे, उपचर्यमाणा ચિકિત્સા કરવામાં આવતાં चिकित्सा करनेपर, शरीरधातु- શરીરના ધાતુઓનું शरीरकी धातुओंको साम्यकरा સામ્ય કરનારા समान करने वाले, समुपलभ्यन्ते જણાય છે देखे जाते हैं ॥ ४ ॥

४ पर्याय पाद (क घ छ ज)

4. When the waste-elements in the body have exceeded their normal proportions and require to be depleted, then being treated by the opposite qualities of cold or heat etc., they are found to return to normal, thus restoring the body balance.

शरीरस्य व्याधीना च अशितलीढादिप्रभवत्वम्—

तेषां तु मलप्रसादाख्यानां धातूनां स्रोतांस्ययनमुखानि। तानि यथाविभागेन यथास्वं धातूनापूरयन्ति ।

तेषां તે इन, मल- મળ मल, प्रसाद- અને પ્રસાદ एव प्रसाद, आख्यानाम् નામના नामकी, धातूनाम् ધાતુઓના धातुओंके, अयनमुखानि જવાના માર્ગો जानेके मार्ग, तु તો तो, स्रोतांसि સ્રોત છે स्रोत हैं, तानि તેઓ ये, यथाविभागेन વિભાગ અનુસાર विभागके अनुसार, यथास्वम् પોતપોતાના अपनी अपनी, धातून् ધાતુઓને धातुओंका, आपूरयन्ति પૂર્ણ કર્યા કરે છે पोषण करते हैं।

5-(1). Of these body-elements known as essential and waste products the body-channels constitute the means of passage. These channels feed the various body-elements in the requisite measure and with the appropriate constituents.

एवमिदं शरीरमशितपीतलीढखादितप्रभवम्। अशितपीतलीढखादितप्रभवाश्चास्मिञ् शरीरे व्याधयो भवन्ति । हिताहितोपयोगविशेषास्त्वत्र शुभाशुभविशेषकरा भवन्तीति ॥ ५॥

एवम् આ પ્રમાણે इस प्रकार, इदम् આ यह, शरीरम् શરીર शरीर, अशित- ખાધેલ अशित, पीत- પીધેલ पीत, लीढ- ચાટેલ लीढ, खादित- અને જમેલ પદાર્થોથી और खादित भक्ष्योंसे, प्रभवम् ઉત્પન્ન થયું છે बना है, अशित ખાધેલ अशित, पीत- પીધેલ पीत, लीढ- ચાટેલ लीढ, खादित- અને જમેલ પદાર્થોથી और खादित

मर्त्योंसे. प्रभवाः ઉત્પન્ન થયેલા उत्पन्न हुए, व्याधयः. વ્યાધિઓ रोगों, अस्मिन् આ इस, शरीरे શરીરમાં शरीरमें भवन्ति થાય છે पैदा होते हैं, अत्र અહીં इस लिए यहा, हिताहित- હિતકર અને અહિતકર આહારના हितकर और अहितकर आहारके, उपयोगविशेषा ઉપયોગના ભેદો उपयोगके भेद, तु તો तो, शुभाशुभ- શુભ અને અશુભ शुभ और अशुभ, विशेषकरा ભેદ કરનારા भेदजनक, भवन्ति થાય છે होते है ॥ ५ ॥

5. In this manner, this body is the result of nourishment ingested in the four-fold manner—eaten, drunk, licked-up and masticated, and similarly the diseases that afflict this body are equally the result of food that is eaten, drunk, licked up and masticated It is the distinction between the use of wholesome diet and that of unwholesome diet that is responsible for the distinction between health and disease in the body.

अत्राग्निवेशस्य प्रश्नः—

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच— दृश्यन्ते हि भगवन्! हितसमाख्यातमप्याहारमुपयुञ्जाना व्याधिमन्तश्चागदाश्च, तथैवाहितसमाख्यातम्;

एवंवादिनम् એ પ્રમાણે કહેતા इस प्रकार कहते हुए, भगवन्तम् ભગવન્ भगवन्, आत्रेयम् આત્રેયને आत्रेयको, अग्निवेशः અગ્નિવેશે अग्निवेशने, उवाच કહ્યું कहा, भगवन् ભગવન્ भगवन्, हितसमाख्यातम् હિતકર કહેવાતા हितकर कहे जानेवाले, अपि પણ भी आहारम् આહારનો आहारका, उपयुञ्जाना ઉપયોગ કરતા મનુષ્યો उपयोग करते हुए मनुष्य, व्याधिमन्त. च રોગી रोगी, अगदा च અને નીરોગ और नीरोग, दृश्यन्ते જોવામાં આવે છે देखे जाते है, तथा एव ते પ્રમાણે જ उसी प्रकार ही, अहितसमाख्यातम् અહિત કહેવાતા આહારનો ઉપયોગ કરનારા રોગી અને નીરોગ જોવામાં આવે છે अहित कहे जानेवाले आहारका उपयोग करते हुए भी रोगी और नीरोग देखे जाते हैं,

6-(1). The worshipful Atreya having thus observed, Agnivesa said to him, 'But O Worshipful One, we see that among those who make use of what is called the wholesome diet, there are the diseased and the healthy alike; so also among those who make use of what is called the unwholesome diet

एवं दृष्टे कथं हिताहितोपयोगविशेषात्मकं शुभाशुभविशेषमुपलभामह इति ॥ ६ ॥

एवम् दृष्टे આમ જોવામાં આવતાં ऐसा देखे जाने पर हिताहित- હિતકર અને અહિતકર આહારના हितकर और अहितकर आहारके, उपयोग- विशेषात्मकम् ઉપયોગના ભેદવાળો उपयोगकी भिन्नताका, शुभाशुभ- विशेषम् શુભ અને અશુભનો ભેદ शुभ और अशुभका भेद, कथम् કેવી રીતે किस प्रकारसे, उपलभामहे इति જાણીએ जाने ॥ ६ ॥

6. Such being our observation how can we conclude that the difference of health and disease proceeds from the difference of wholesome and unwholesome dietary observance?'

अहिताहारोपयोगादन्या रोगप्रकृतय, हिताहारोपयोगिनोऽपि व्याधिमत्त्वे हेतु —

तमुवाच भगवानात्रेयः—न हिताहारोपयोगिनामग्निवेश! तन्निमित्ता व्याधयो जायन्ते, न च केवलं हिताहारोपयोगादेव सर्वव्याधिभयमतिक्रान्तं भवति. सन्ति ह्यृतेऽप्यहिताहारोपयोगादन्या रोगप्रकृतयः, तद्यथा—कालविपर्यय, प्रज्ञापराध, शब्दस्पर्शरूपरसगन्धाश्चासात्म्या इति।

भगवान् ભગવાન भगवान, आत्रेय આત્રેયે आत्रेयने, तम् તેને अग्निवेशको, उवाच કહ્યું कहा, अग्निवेश

७. नामन्—हि जायेरन् (ग च.)

हे અગ્નિવેશ! हे अग्निवेश!, हिताहार- હિતકર આહાર हित आहारको, उपयोगिनाम् કરનારાઓને सेवन करनेवालोंमें, तन्निमित्ता તે કારણથી हित आहारके उपयोगसे, व्याधय રોગો रोग, न जायन्ते થતા નથી उत्पन्न नहीं होते, केवलम् કેવળ केवल, हिताहार- હિતકર આહારના हितकर आहारके, उपयोगात् एव ઉપયોગથી જ उपयोगसे ही, सर्वव्याधिभयम् સર્વ રોગોનો ભય सब व्याधियोंका भय, अतिक्रान्तम् ટાળી શકાતો दूर, न भवति નથી नहीं होता, हि કારણકે क्योंकि, अहिताहार- અહિતકર આહારના अहित आहारके, उपयोगात् ઉપયોગ उपयोगके, ऋते સિવાય सिवा, अपि પણ भी, अन्या બીજા अन्य भी, रोगप्रकृतय રોગનાં કારણો रोगके कारण, सन्ति છે हैं, तत् यथा જેમકે जैसे कि, कालविपर्यय કાળની વિપરીતતા कालविपर्यय, प्रज्ञापराध પ્રજ્ઞાપરાધ प्रज्ञापराध, असात्म्या. અને અસાત્મ્ય असात्म्य, शब्द-स्पर्श-रूप-रस-गन्धा च इति શબ્દ-સ્પર્શ-રૂપ-રસ અને ગંધ शब्द-स्पर्श-रूप-रस और गन्ध,

7-(1) The worshipful Atreya answered, " O Agnivesa, among those who observe a wholesome diet no diseases arise which may be ascribed to such observance, but at the same time by the use of wholesome diet alone, all fear of diseases is not obviated since there are disease-inducing factors other than the use of the unwholesome diet. These are–seasonal abnormality, volitional transgression and the non-homologatory contact of sound, touch, sight, taste and smell.

ताश्च रोगप्रकृतयो रसान् सम्यगुपयुञ्जानमपि पुरुषमशुभेनोपपादयन्ति, तस्माद्धिताहारोपयोगिनोऽपि दृश्यन्ते व्याधिमन्तः ।

ता च ते ये, रोग-प्रकृतय રોગનાં કારણો रोगके कारण, रसान् રસોનો रसोंका, सम्यक् સરખી રીતે सम्यक्, उपयुञ्जानम् ઉપયોગ કરનાર उपयोग करते हुए, अपि पुरुषम् પુરુષમાં પણ पुरुषमें भी अशुभेन વ્યાધિ रोग, उपपादयन्ति કરે છે उत्पन्न कर देते हैं, तस्मात् તેથી इस लिए, हिताहार- હિતકર આહારનો हित आहारके, उपयोगिन ઉપયોગ કરનારા उपयोग करनेवाले, अपि પણ भी, व्याधिमन्तः રોગી रोगी, दृश्यन्ते દેખાય છે देखे जाते हैं;

7 (2). These three pathogenic factors serve to bring down disease even on a person who avails himself of nutrition in the right manner. Hence is it that even among the ranks of wholesome eaters there are persons afflicted with disease.

अहिताहारोपयोगिनोऽपि आरोग्यदर्शने हेतु.—

अहिताहारोपयोगिनां पुनः कारणतो न सद्यो दोषवान् भवत्यपचारः। न हि सर्वाण्यपथ्यानि तुल्यदोषाणि, न च सर्वे दोषास्तुल्यबलाः, न च सर्वाणि शरीराणि व्याधिक्षमत्वे समर्थानि भवन्ति। तदेव ह्यपथ्यं देशकालसंयोगवीर्यप्रमाणातियोगाद्भूयस्तरमपथ्यं संपद्यते।

अहिताहार- અહિતકર આહારનો अहित आहारका, उपयोगिनाम् ઉપયોગ કરનારાઓનો सेवन करने वालोंमें, पुनः વળી फिर, अपचारः અપચાર अपथ्य, कारणत કારણને લીધે कारणसे, सद्यः તરત तुरंत, दोषवान् રોગને ઉત્પન્ન કરનાર रोगोत्पादक, न भवति થતો નથી नहीं होता, हि કારણકે क्योंकि, सर्वाणि સર્વ सब, अपथ्यानि અપથ્યો अपथ्य, तुल्यदोषाणि સમાન દોષવાળાં तुल्य दोषवाले, न હોતાં નથી नहीं होते, सर्वे च અને સર્વ और सब, दोषा દોષો दोष, तुल्यबला સમાન બળવાળા तुल्य बलवाले, न હોતા નથી नहीं होते, सर्वाणि અને સર્વ और सब, शरीराणि च શરીરો शरीर, व्याधिक्षमत्वे

---

७. ताश्च–इत्येता· (ग)
,, अशुमेनो°–अशुमेन व्याधिनो° (क छ द.)

७ कारणत –कारणविशेषत. (घ. च ध)
,, व्याधिक्षमत्वे–व्याधिक्षमित्वे (ज घ.)

વ્યાધિને સહન કરનારપણામાં रोगोंको सहनेमें, समर्थानि સમર્થ समर्थ, न भवन्ति હોતાં નથી नही होते, हि तत् एव કારણ કે તે જ क्योंकि यही, अपथ्यम् અપથ્ય अपथ्य, देश- દેશ देश, काल- કાળ काल, संयोग- સ ચોગ सयोग, वीर्य- વીર્ય वीर्य, प्रमाण- તથા પ્રમાણના और मात्राके, अतियोगात् અતિયોગથી अतियोगसे, भूयस्तरम् અતિ અધિક अत्यधिक, अपथ्यम् અપથ્ય अपथ्य, संपद्यते બની જાય છે बन जाता है,

7-(3). Similarly if among the unwholesome eaters the dietetic offences do not produce immediate ill-consequences, it is on account of certain other factors Fot not all dietetic errors are equally generative of morbidity, nor is all morbidity of equal intensity, nor yet again, are all constitutions (equally) capable of resisting disease Thus for instance, the same dietetic indiscretion when linked to aggravating factors of clime, season, combination, potency and dosage, becomes a much more serious offence.

स एव दोषः संसृष्टयोनिर्विरुद्धोपक्रमो गम्भीरानुगतश्चिरस्थितः प्राणायतनसमुत्थो मर्मोपघाती कष्टतमः क्षिप्रकारितमश्च संपद्यते ।

स एव दोषः તે જ દોષ यही दोष, संसृष्टयोनि ઘણાં કારણોથી ઉત્પન્ન થયેલો वहुतसे कारणोंसे उत्पन्न, विरुद्धोपक्रमः વિરુદ્ધ ચિકિત્સાવાળો विरुद्ध चिकित्सावाला, गम्भीरानुगत· ગભીર ધાતુઓમાં પહોંચી ગયેલો गंभीर धातुओंमें प्रविष्ट, चिरस्थित લાંબા કાળથી સ્થિર થયેલો चिरस्थायी, प्राणायतन- શંખ વગેરે પ્રાણાયતનમાં शखादि प्राणायतनोंमें, समुत्थ. ઉત્પન્ન થયેલો उत्पन्न, मर्मोपघाती અને મર્મસ્થાનને હાનિ કરનાર હોય તો और मर्मको हानि पहुंचानेवाला हो तो, कष्टतम· અતિશય કષ્ટસાધ્ય कष्टतम, क्षिप्रकारितम च અને શીઘ્ર મૃત્યુકારક और अत्यन्त शीघ्रकारी, संपद्यते બને છે हो जाता है,

7-(4) Similarly, the same morbidity if arising from a multiplicity of factors, if entailing mutually contradictory processes, if deep-seated, if long-standing, if sprung from one of the (ten) resorts of life, or if affecting a vital part, becomes the more formidable or the more fulminating

अव्याधिसहशरीरस्य लक्षणम्, व्याधिसहशरीरस्य लक्षणम्—

शरीराणि चातिस्थूलान्यतिकृशान्यनिविष्टमांसशोणितास्थीनि दुर्वलान्यसात्म्याहारोपचितान्यल्पाहाराण्यल्पसत्त्वानि च भवन्त्यव्याधिसहानि, विपरीतानि पुनर्व्याधिसहानि ।

अतिस्थूलानि અતિસ્થૂલ अतिस्थूल, अतिकृशानि અતિકૃશ अतिकृश, अनिविष्ट- શિથિલ शिथिल, मांस- शोणित- अस्थीनि માંસ—રક્ત—હાડકાંવાળાં मास- शोणित और अस्थिवाले, दुर्वलानि દુર્બળ दुर्वल, असात्म्य- અસાત્મ્ય असात्म्य, आहार- આહારથી आहारसे, उपचितानि પોષાયેલાં पुष्ट, अल्पाहाराणि અલ્પ આહારવાળાં अल्प आहार करनेवाले, अल्पसत्त्वानि च અને અલ્પ સત્ત્વવાળાં और अल्प सत्त्ववाले, शरीराणि શરીર शरीर, अव्याधिसहानि च વ્યાધિને સહન નહિ કરનારાં व्याधिको सहन नही करनेवाले, भवन्ति થાય છે होते हैं, विपरीतानि એથી વિપરીત લક્ષણોવાળાં શરીર इनसे विपरीत लक्षणोंवाले शरीर, पुन વળી फिर, व्याधिसहानि વ્યાધિને સહન કરનારાં થાય છે रोगोंको सहन करनेवाले होते हैं,

7-(5). Constitutions that are very corpulent or very emaciated or composed of ill-formed flesh, blood and bone or debilitated, or nourished on unwholesome diet, or of persons given to spare diet, or of feeble-minded

७ कष्टतम—भूयान कष्टतम (ख. ग. घ त. थ)

७ शोणितास्थीनि—शोणितादीनि (ङ)

persons, are incapable of resisting disease. Constitutions of a contrary description are conversely capable of resisting disease.

व्याधीना मृदुदारुणत्वादौ हेतु —

एभ्यश्चैवापथ्याहारदोषशरीरविशेषेभ्यो व्याधयो मृदवो दारुणाः क्षिप्रसमुत्थाश्चिरकारिणश्च भवन्ति। त एव वातपित्तश्लेष्माण. स्थानविशेषे प्रकुपिता व्याधिविशेषानभिनिर्वर्तयन्त्यग्निवेश ! ७

एभ्यः આ इन, अपथ्य- અપથ્ય अपथ्य, आहार- આહાર आहार, दोष- દોષ दोष, शरीरविशेषेभ्य च एव અને શરીરના ભેદોથી और शरीरकी भिन्नतासे, मृदव મૃદુ मृदु, दारुणा ભયંકર दारुण, क्षिप्रसमुत्था· તરત ઉત્પન્ન થનાર शीघ्र उत्पन्न होनेवाले, चिरकारिण· અને લાંબે વખતે વિકારને ઉત્પન્ન કરનારા और देरसे विकारको उत्पन्न करनेवाले, व्याधय રોગો रोग, भवन्ति થાય છે होते हैं, अग्निवेश ! હે અગ્નિવેશ ! हे अग्निवेश !, स्थानविशेषे ભિન્ન ભિન્ન સ્થાને भिन्न भिन्न स्थानमें, प्रकुपिताः પ્રકોપ પામેલા प्रकोपको प्राप्त हुए, ते एव એ જ वे ही, वातपित्तश्लेष्माणः વાત, પિત્ત તથા કફ वात, पित्त तथा कफ, व्याधिविशेषान् જુદા જુદા રોગોને भिन्न भिन्न व्याधियोंको, अभिनिर्वर्तयन्ति ઉત્પન્ન કરે છે उत्पन्न करते हैं ॥ ७ ॥

7. It is from these diverse and varied factors of unwholesome diet and the nature of humoral morbidity and constitution that the diverse kinds of disease—mild, severe, of rapid or slow incubation—take their rise It is again, O Agnivesa, in consequence of these etiological factors that the morbid humors vata, pitta and kapha getting provoked in different sites of the body give rise to different kinds of disease.

रसप्रदोषजा रोगा —

तत्र रसादिषु स्थानेषु प्रकुपितानां दोषाणां यस्मिन् स्थाने ये ये व्याधयः संभवन्ति तांस्तान् यथावदनुव्याख्यास्यामः ॥ ८ ॥

तत्र તે इन, रसादिषु રસાદિક रसादि, स्थानेषु સ્થાનોમાં स्थानोंमें, दोषाणाम् દોષો दोष, प्रकुपितानाम् પ્રકુપિત થતાં प्रकुपित होने पर, यस्मिन् જે जिस, स्थाने સ્થાનમાં स्थानमें, ये ये જે જે जो जो, व्याधयः વ્યાધિઓ रोग, संभवन्ति ઉત્પન્ન થાય છે उत्पन्न होते हैं, तान् तान् તેઓ તેઓનું उन उनका, यथावत् ક્રમાનુસાર क्रमानुसार, अनुव्याख्यास्याम વ્યાખ્યાન કરશું व्याख्यान करेंगे, ॥ ८ ॥

8. Now we shall delineate precisely in what particular sites what particular diseases arise as the result of the three humors getting vitiated in the different systems such as that of nutrient fluid etc ;

अश्रद्धा चारुचिश्चास्यवैरस्यमरसज्ञता ।
हृल्लासो गौरवं तन्द्रा साङ्गमर्दो ज्वरस्तमः ॥ ९ ॥
पाण्डुत्वं स्रोतसां रोधः क्लैब्यं सादः कृशाङ्गता ।
नाशोऽग्नेरयथाकालं वलयः पलितानि च ॥ १० ॥

रसप्रदोषजा रोगा,

अश्रद्धा च અન્ન ખાવાની ઇચ્છાનો અભાવ भोजनमें अनिच्छा, अरुचिः च અન્નનો અણગમો अरुचि, आस्य-वैरस्यम् મુખની વિરસતા मुखकी विरसता, अरसज्ञता રસની ખબર ન પડવી रसकी अप्रतीति, हृल्लास મોળ जी मचलाना, गौरवम् ભારેપણુ भारीपन, तन्द्रा તન્દ્રા तन्द्रा, साङ्गमर्द અંગમર્દસહિત अंगोके टूटनेके साथ, ज्वर જ્વર ज्वर, तमः અંધારાં अंधेरी आना, पाण्डुत्वम् પાંડુતા पाण्डुता, स्रोतसाम् સ્રોતોનુ स्रोतोंका, रोध રુંધન अवरोध, क्लैब्यम् નપુંસકતા क्लीवता, साद શિથિલતા शिथिलता, कृशाङ्गता કૃશતા अङ्गोंमें कृशता,

१. अरसज्ञता—अवसादता (प.)
,, हृल्लासो . .. ज्वरस्तम.—अङ्गमर्दो ज्वरस्तन्द्रा हृल्लासो गौरवं तमः (ग. च. ध)

अग्ने અગ્નિનો ભૂખકા, नाशः નાશ नाश, अयथा-कालम् અકાળે असमयमें, वलय કરચલી झुरिया, पलितानि च અને પળિયાં और बालोंका सफेद होना, इति એ ये, रसप्रदोषजा રસના દોષથી ઉત્પન્ન થયેલા रसदोषसे उत्पन्न होनेवाले, रोगा રોગ છે रोग हैं ॥ ९-१०½ ॥

9-10½ Disinclination for food, anorexia, disguesia, aguesia, nausea, heaviness, torpor, fever with body-ache, faintness, pallor, obstruction of the channels, impotency, asthenia, wasting of the body, loss of the gastric fire and premature formation of wrinkles and greying of hair—these are the diseases arising from the morbidity of the body-nutrient fluid.

रक्तदोषजा रोगा —

वक्ष्यन्ते रक्तदोषजाः ।
कुष्ठवीसर्पपिडका रक्तपित्तमसृग्दरः ॥ ११ ॥
गुदमेढ्रास्यपाकश्च प्लीहा गुल्मोऽथ विद्रधिः ।
नीलिका कामला व्यङ्गः पिप्लवस्तिलकालकाः ॥१२॥
दद्रुश्चर्मदलं श्वित्रं पामा कोठास्रमण्डलम् ।
रक्तप्रदोषाज्जायन्ते,

रक्तदोषजाः હવે રક્તના દોષથી ઉત્પન્ન થયેલા રોગો रक्तदोषजन्य रोगोंको, वक्ष्यन्ते કહેવામાં આવશે कहेंगे, कुष्ठ- કુષ્ઠ कुष्ठ, वीसर्प- વીસર્પ वीसर्प, पिडका પિડકા पिडका, रक्तपित्तम् રક્તપિત્ત रक्तपित्त, असृग्दर રક્તપ્રદર रक्तप्रदर, गुद- ગુદા गुदका पकना, मेढ्र- શિશ્ન मेढ्रनका पकना, आस्यपाक च तथा મુખનો પાક तथा मुखपाक, प्लीहा પ્લીહા प्लीहा, गुल्म ગુલ્મ गुल्म, अथ विद्रधि વિદ્રધિ विद्रधि, नीलिका નીલિકા नीलिका, कामला કમળો कामला, व्यङ्ग વ્યંગ व्यंग, पिप्लव પિપ્લુઓ पिप्लुओं, तिलकालकाः તિલકાલક तिलकालक, दद्रु દાદર दद्रु चर्मदलम् ચર્મદલ चर्मदल, श्वित्रम् શ્વિત્ર श्वित्र, पामा ખસ पामा, कोठ- કોઠ कोठ, अस्रमण्डलम् અને રક્તમંડલ और रक्तमण्डल, इति એ ये रोग, रक्तप्रदोषात् રક્તના દોષથી रक्तदोषसे, जायन्ते ઉત્પન્ન થાય છે उत्पन्न होते हैं ॥ ११-१२½ ॥

11-12½ Now will be described diseases arising from morbidity in the blood. Dermatosis, acute spreading affections, pimples, hemothermia, menorrhagia, inflammation of the rectum, phallus and the mouth, splenic disorders, gulma, abscesses, bluish black moles, jaundice, freckles, port-wine marks, moles, ring-worm, abrasion of skin, leucoderma, papules, wheals, and red circular patches—these arise from the morbidity in the blood.

मांसप्रदोषजा रोगा.—

शृणु मांसप्रदोषजान् ॥ १३ ॥
अधिमांसार्बुदं कीलं गलशालूकशुण्डिके ।
पूतिमांसालजीगण्डगण्डमालोपजिह्विकाः ॥१४॥
विद्यान्मांसाश्रयान्,

मांसप्रदोषजान् હવે માંસના દોષથી ઉત્પન્ન થયેલા રોગો मांसदोषजन्य रोगोंको, शृणु સાંભળો सुनो, अधिमांसार्बुदम् અધિમાંસ અર્બુદ अधिमांस अर्बुद, कीलम् અર્શ अर्श, गलशालूक- ગલશાલૂક गलशालूक, शुण्डिके ગલશુંડિકા गलशुंडिका, पूतिमांस- પૂતિમાંસ पूतिमांस, अलजी- અલજી अलजी, गण्ड- ગંડરોગ गण्ड रोग, गण्डमाला- ગંડમાળ गण्डमाल, उपजिह्विका- ઉપજિહ્વિકા और उपजिह्विका, मांसाश्रयान् એઓને માંસાશ્રિત इनको मांसाश्रित, विद्यात् જાણવા जानना चाहिए ॥ १३-१४½ ॥

13-14½. Now listen to an enumeration of the diseases which arise from the morbidity in the flesh; granuloma,

१२ प्रदोषात्--प्रकोपात् प

१३ मांसप्रदोषजान्--मांसप्रकोपजान् (ग. च.)

१४ कील गलशालूकशुण्डिके--कीलगलशालूकशुण्डिकाः (ग घ.)

malignant tumor, piles, warts, sloughing of the flesh, dry gangrene, adenoncus, deradenoncus—these are the diseases arising from the flesh.

मेद संश्रया रोगा —

मेदःसंश्रयांस्तु प्रचक्ष्महे ।
निन्दितानि प्रमेहाणां पूर्वरूपाणि यानि च ॥१५॥

प्रमेहाणाम् પ્રમેહોનાં प्रमेहोंके, यानि च જે जो, पूर्वरूपाणि કેશની જટિલતા આદિ પૂર્વરૂપોની केशकी जटिलता आदि पूर्वरूपोंकी, निन्दितानि નિદાન સ્થાનના ચોથા અધ્યાયમાં નિંદા કરવામાં આવશે निदानस्थानके चौथे अध्यायमें निन्दा की जायगी, मेदः—स्थयान् तु તેઓને મેદથી થયેલા રોગો उनको मेदसे उत्पन्न हुए रोगों, प्रचक्ष्महे અમે કહીએ છીએ हम कहते हैं ॥१५॥

15. We shall now describe the diseases arising from the morbidity in the fat. Their number is limited to the censurable ones out of the premonitory signs of the anomalies of the urinary secretion.

अस्थिप्रदोषजा रोगा —

अध्यस्थिदन्तौ दन्तास्थिभेदशूलं विवर्णता ।
केशलोमनखश्मश्रुदोषाश्चास्थिप्रदोषजाः ॥१६॥

अध्यस्थिदन्तौ અધ્યસ્થિ-અધિદન્ત अध्यस्थि-अधिदन्त, दन्त- દન્તભેદ दन्तभेद अस्थिभेद અસ્થિભેદ अस्थिभेद, शूलम् શૂળ शूल, विवर्णता વિવર્ણતા विवर्णता, केश-लोम- કેશ-રુવાડાં केश-लोम, नख-श्मश्रु- નખ તથા દાઢી મૂછના नख और श्मश्रुके, दोषाः च રોગો रोग अस्थि-प्रदोषजा. એ હાડકાના દોષોથી થયેલા રોગો છે ये अस्थिदोष-जन्य रोगों हैं ॥ १६ ॥

16. Hypertrophy of the bones and teeth, atrophy and pain in the teeth and bones, discoloration and pathological conditions of the hairs of the head, body and face and nails are the diseases arising from the morbidity in the bones

मज्जप्रदोषजा रोगा —

रुक् पर्वणां भ्रमो मूर्च्छा दर्शनं तमसस्तथा ।
अरुषां स्थूलमूलानां पर्वजानां च दर्शनम् ॥१७॥
मज्जाप्रदोषात्,

पर्वणाम् પર્વોમાં पर्वोंमें, रुक् વેદના दर्द, भ्रमः ભ્રમ भ्रम, मूर्च्छा મૂર્ચ્છા मूर्च्छा, तथा तमस અંધારાનું अंधकारका, दर्शनम् દેખાવું दर्शन, पर्वजानाम् च અને પર્વ પર થયેલ और पर्वोंमें उत्पन्न, स्थूलमूलानाम् સ્થૂલ મૂળવાળાં मोटी जड़वाले, अरुषाम् વ્રણોનું व्रणोंका, दर्शनम् દેખાવું એ होना वह, मज्जप्रदोषात् મજ્જાના દોષથી થય છે मज्जाजन्य रोग हैं ॥ १७ ॥

17 Pain in the joints, giddiness, fainting, faintness, and development of deep-seated wounds in the joints—these are from the morbidity in the marrow.

शुक्रदोषजा रोगा —

शुक्रस्य दोषात् क्लैब्यमहर्षणम् ।
रोगि वा क्लीबमल्पायुर्विरूपं वा प्रजायते ॥ १८ ॥
न चास्य जायते गर्भः पतति प्रस्रवत्यपि ।
शुक्रं हि दुष्टं सापत्यं सदारं बाधते नरम् ॥१९॥

